वेदकालीननारीशिक्षा

डॉ प्रमोदिनी पण्डा
एम. ए, एम. एड्,
(पी-एच०डी)

ओरियेण्टल बुक सेन्टर
दिल्ली (भारत)

प्रकशक:
ओरियन्टल बुक सेन्टर
दुकान न० १८;५५७४, ए, चौं० काशीराम मार्केट
दुर्गा काम्पलेक्स, न्यू चन्द्रावल
दिल्ली- ११०००७

अन्य प्राप्ति स्थान :
भारतीय विद्या संस्थान
सी० २७/७९, जगतगंज
वाराणसी- (उ० प्र०)

संस्करण-१९९८
मूल्य: १५०.००

मुद्रक:
तरूण ऑफसैट, दिल्ली

WOMEN EDUCATION IN VEDIC PERIOD

Dr. Pramodini Panda
M. A, M. Ed. (Ph.D)

ORIENTAL BOOK CENTRE
DELHI

Publisher
Oriental Book centre
Shop No.18, 2nd Floor
5574 A, Ch. Kashi Ram Market
Durga Complex
New Chandrawal
Delhi-110007

Avaible at :
Bharatiya Vidya Sansthan
C-27/79, Jagat Ganj
Varanasi-(U. P.)

THIS PUBLICATION HAS BEEN BROUGHT OUT WITH THE FINANCIAL ASSISTANCE FROM TIRUMALA TIRUPATI DEVASTHANAM UNDER THEIR SCHEME OF AID TO PUBLISH RELIGIOUS BOOK

Ed. 1998
Price- 150.00

Printed by:
Tarun Offset, Delhi

Justice Ranganath Mishra

Formerly chief Justice of the supreme court.

Formerly chairperson, National Human Right Commission,

Chairman, Central Sanskrit Board, Ministry of Human Resource Development, Govt. of India.

FOREWORD

I am happy to write a Foreword for the book entitled ``Women Education in vedic period". The Vedas are considered as the earliest record of human knowledge current in the then society. Vedas are known as Śruti and they were passed on from generation to generation through the oral tradition. It has now been universally acknowledged that the level of learning available in the Vedas is perhaps of the highest order that mankind could ever reach. The contents of the Vedas covered the entire field of human wisdom; in fact, they went beyond it and the contents related to aspects of divinity.

Man and woman were conceived as complementary and inter-dependent and together made on single unit. Nārī and Puruṣa, therefore, were half and half and when joined made a complete whole. In ancient India, society was divided into four classes: Brāmhaṇa (teacher); Kṣatriya (warrior); Vaiśya (trader) and Śūdra (helpers to society). The division was not

according to birth, but according to the occupation one adopted. There were several instances where by change of occupation or profession, one changed his category. In the absence of any rigidity about the Varṇa-division-women of any particular class in society were not looked down and in Vedic times, Man and Woman appeared to have social equality subject, of course, to the position that the husband was looked upon as the protector of his wife and the wife looked upon the husband as her master.

In the family, the position of the wife was, indeed, high. Gṛhinī, as she used to be known, gave her the position of controller of the house. The husband did not interfere in the autonomy she enjoyed in administering the household. While the husband (Kartā) had overall control, in the absence of interference, the Gṛhinī appeared to be the real and affective administrator and, as a fact, was in a position to manage the affairs of the family according to her perception. The oft-quoted statement that ``Gods roam about in that society where women are worshipped" is, indeed, a real description of the position in the Vedic period. In the Scriptures, the position assigned to Durgā is an appropriate extolling of the position of pride offered to Mother. The position assigned in the post-Vedic period to Satī, Sītā, Mahākalṣmī, Anusūyā, Sāvitrī and Ahalyā is illustrative of this situation. Pūjyaśrī Chandraśekharendra, Saraswatī Swamy, the Paramāchārya of Kanchi muth, has said (See, Hindu Dharma) :-

"It is not that the girl is considered inferior and asked to surrender to a man-that is her husband. The boy too is asked to surrender as a child to the guru. It is the view of the Śāstras that the age at which the girl is married and surrenders to her

husband must be the same as that at which the boy surrenders to the guru.

Talking of the husband and the wife, the question whether the one is superior to the other or inferior is of no consequence. Equally unimportant is the question of rights and status. If this is realised, surrender will be seen to be of the utmost importance. We must appreciate the fact that it is in keeping with this view that the concept of Upanayana has taken shape in the case of boys and of marriage in the case of girls."

Upanayana was prescribed for the three higher castes and for those who served by doing manual work, it was not provided. In fact, the Gurukula system of education was meant for the boys of the three higher castes and Upanayan was the gate of entitlement for entry into the Gurukula.

In the Vedic times, there appears to have been no restriction on women getting educated. Prof. Satchidananda Murty in his book, Vedic Hermeneutics has stated :-

``To summarise, the Veda itself claims to be an universal scripture meant for all human beings. Whoever has the sincere desire (arthitva) and capacity (sāmarthya) is eligible to study it either in the original or in its translations. Some smrtis and sages assert that Śūdras and women are not entitled to Vedic study, while other smṛtis and sages maintain that they too are entitled. Good sense, justice and reason demand that the latter view be accepted. Everyone has the right to the highest wisdom from the best source available. Moreover, as the Western scholars (who according to some smṛti writers would be mlecchas) as well as those who are not traivarṇikas (e.g., Prince Dara Shikoh, Swami Vivekananda and Sri Aurobindo)

have studied, edited, translated, expounded, or published the Vedas and Upanisads, it is not only unjust but ridiculous to support any more the tabu on Vedic study. People of all castes including the `Harijans' and `Girijans' and of all nationalities-irrespective of their sexṣshould be encouraged to study the Veda."

Woman was recognised as ardhānginī of the husband and had equal status in the matter of education, there being no taboo of any sort. Gārgī represents womanhood in the traditional Indian society in the field of education and records are replete to support the fact of availability of education for women.

In Bharatiya Vidya Bhavan's publication, The Vedas, there is clear indication at pp. 253-254 that the Dharma Śāstras did prescribe a system of education even for the class of helpers of the society. According to requirement, system of education was perhaps different from that meant for the higher castes, but irrespective of sex, education was available to all. The purpose and meaning of the ceremonies and rituals had to be understood by those who performed them and, therefore, the basic education which would provide the capacity to understand the same was required. It is true that Gurukulas which were the prevalent educational institutions for formal teaching were not open to women. The structure and the system of running of Gurukulas were not perhaps suitable for keeping women students. The teaching facility was, however, available within the family and often the huabsnd turned to be the teacher of his wife. There have been several instances where women have exhibited exceptional learning. Acharya Śankara entered into debate with Maṇdana Misra and when

he failed, his wife offered challenge. This is a matter of record. In fact, the great Śankara at one stage conceded defeat and came back equipped to face the challenge later.

Vedic times had, therefore, no restriction on education of women and social inhibition on the ground of sex was not being practised, though adequate educational institutions for formal education were perhaps not available.

During the post-Vedic era, women lost the elevation and became confined to the family house. The author has gone into the matter in depth and presented a brilliant analysis of the material to reach her conclusion.

The issue of status of women and their right to equal opportunity including education is of great importance today. For quite some time, a struggle is on for women's emancipation. There can be no two opinions that women are entitled to their status and position which can not be inferior to those of man. The claim of equality postulates adequate opportunity for education and an opportunity to deliver the excellence out of the potentialities provided by nature. Drawing out excellence from every person being the goal of education, every man and woman should have full facility to obtain the best of education.

Women's education through the ages has assumed importance and in the present set-up, women's learning during the Vedic times has become very relevant. This book certainly presents a clear picture of the situation and would help the reader in acquiring a clear and correct picture of the situation.

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी के माननीय कुलपति–डॉ० मण्डन मिश्र जी की शुभाशंसा

डॉ० प्रमोदिनी पण्डा द्वारा लिखित 'वेदकालीन नारी शिक्षा' ग्रन्थ को मैंने ध्यानपूर्वक आद्योपान्त देखा। भारतीय नारी को लेकर समय-समय पर अनेक विद्वानों ने बहुत कुछ लिखा है परन्तु वैदिककाल की नारी शिक्षा के ऊपर बहुत कम समालोचकों ने ध्यान दिया।

वैदिक ग्रन्थों एवं परवर्ती प्राचीन साहित्य में नारी के अनेक रूपों का दर्शन मिलता है। भारतीय संस्कृति में नारी तो साक्षात् देवी है। जीवन की धारा में नारी पुरुष का अभिन्न अंग बनकर श्रेय एवं प्रेय मार्गों की साधिका बनी है। मनु जैसे धर्मशास्त्रकारों ने नारी को स्वतन्त्र न मानते हुए भी नारी को पूज्या बताया है।

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'

वेद में यह बताया गया है कि पत्नी ही घर है और आश्रम स्थल भी। अतः गृह की एक मात्र अधिष्ठात्री देवी नारी ही है।

वेद ज्ञान की खान है। यह ऐसा प्रमुख ग्रन्थ है जो मानव जाति को पथ प्रदर्शन कराता है। वेद का प्रमुख विषय है–ज्ञान, कर्म, उपासना (त्रैगुण्यविषया वेदाः)। वेदों में कोई भी बात स्त्री अथवा पुरुष को संकेत करके अथवा स्त्री पुरुष के भेद को लक्ष्य करके नहीं कही गई है। उनमें जो भी कुछ कहा गया है समग्र मानव जाति के ऊपर समान रूप से कहा गया है। नारियों के उत्कर्ष को प्रकटित करने वाले अनेक सूक्तों का वर्णन वेदों में मिलता है–

यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा।

एवं त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य च॥

अथर्ववेद. 14/1/43

(जैसे बलशाली समुद्र नदियों का साम्राज्य चलाता है, ऐसे तू पति के घर में पहुंच कर साम्राज्ञी होकर वहां रह।)

वैदिक ऋषि नारी को इस प्रकार सौभाग्य का आशीर्वाद देता है–

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव।

ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु॥

ऋग्वेद 10/85/46

(हे वधु। तू श्वशुर, सास, ननद और देवरों की साम्राज्ञी–महारानी के सदृश होओ, सब के ऊपर प्रभुत्व कर) इससे यह प्रतीत होता है कि एक परिवार में नारी का कैसा स्वागत होता था। एतद् द्वारा तत्कालीन समाज में नारी प्रतिष्ठा की झांकी झलक आती है।

इन तथ्यों से सुशोभित यह ग्रन्थ बहु आयामी है। पुस्तक का विषय विभाजन सुनियोजित, सुचिन्तित, सुरुचिपूर्ण एवं एक प्रकार से 'चतुरस्त्रशोभि' है। इसमें सभी तथ्यों का प्रयत्नपूर्वक आकलन करने का स्तुत्य प्रयास किया गया है। मैं विश्वास करता हूं कि यह पुस्तक सभी स्तर के विद्यार्थियों एवं गवेषकों के लिए बहु उपयोगी सिद्ध होकर एक कीर्तिमान स्थापित करेगी।

(डॉ० मण्डन मिश्र)

कुलपति

संपूर्णानन्द संस्कृत विश्वविद्यालय

वाराणसी–221 002.

शिव शङ्कल्प

भारतीय मान्यता है कि सृष्टि के प्रारम्भ में जगन्नियन्ता ने अपने तेज को दो भागों में विभक्त कर नर-नारी के स्वरूप का सृजन किया। इससे यह स्पष्ट होता है कि सृष्टिचक्र के नर-नारी अविभाज्य अङ्ग हैं। इन दोनों का समाज में वही स्थान है जो मानव-शरीर में हृदय की गति का है। शरीर में हृदय की गति की तीव्रता एवं मन्दता–दोनों की गतियाँ अस्वस्थता की द्योतक होती हैं। अत: चिकित्साशास्त्र के अनुसार शरीर में हृदयगति का समभाव में चलना श्रेयस्कर माना जाता है। समाज में यही स्थिति नर-नारी की भी है। इन दोनों में से यदि कोई सामाजिक एवं शास्त्रीय बन्धनों को तोड़कर तीव्र गति से चलते हैं अथवा अपने विचारों को कुण्ठित कर मन्दगति का अनुसरण करते हैं तो निस्सन्देह कुल, समाज एवं राष्ट्र के पतन का कारण बन सकते हैं।

संस्कृत साहित्य, विशेषतया वैदिक वाङ्मय में ''नारी'' का महनीय स्थान है। ''नारी'' शब्द के पर्यायवाची वैदिक पदों को यदि हम लें तो उनके निर्वचन से यह बात स्पष्ट रूप से प्रतिभासित होती है। उदाहरणार्थ–''नारी'' शब्द की व्युत्पत्ति करते हुए आचार्य सायण का कथन है कि–''नृणां महावीरार्थिनाम् उपकारित्वात् नारि:''। इसी प्रकार ऋग्वेद में अनेकत्र ''मेना' शब्द का प्रयोग नारी के लिये किया गया है। ''मेना'' का व्युत्पत्तिलभ्य अर्थ है–''मानयन्ति एना: (पुरुषा:)''। इसीप्रकार वेद में ''योषा'' पद भी नारी के लिये प्रयुक्त हुआ है। निरुक्तकार आचार्य यास्क ने ''योषा'' पद की व्युत्पत्ति करते हुए कहा है–''योषा, यौते: मिश्रणार्थस्य, सा हि मिश्रयति आत्मानं (धर्मार्थकाममोक्षेषु) पुरुषेण साकम्''।

उपर्युक्त संज्ञापदों की व्युत्पत्तियों से यह स्पष्ट होता है कि नारी का स्थान वैदिक धर्म में सामाजिक, धार्मिक, आर्थिक आदि दृष्टियों से पुरुष के बराबर है। वैदिक वाङ्मय के अनुशीलन से यह परिलक्षित है कि प्राचीनकाल में नारी-शिक्षा का विशेष महत्त्व था। अतएव अपाला, घोषा, लोपामुद्रा, विश्ववारा आदि ऋषिकायें ''मन्त्रद्रष्ट्री'' हुईं। इन ऋषिकाओं द्वारा दृष्ट मन्त्रों से यह सन्देश मिलता है कि किसी भी समाज या राष्ट्र को अपनी अभ्युन्नति के लिये नारी शिक्षा पर विशेष ध्यान देना चाहिये। वेद में ऐसे भी वर्णन मिलतें हैं जिनसे यह सिद्ध होता है कि नारियों ने अश्वविद्या, चिकित्साशास्त्र आदि में पारङ्गत हो कर महनीय कार्य किये तथा युद्ध में सक्रिय भाग लेकर अपने शौर्य का परिचय दिया। इस प्रकार वैदिक वाङ्मय में नारी के बहु-आयामी स्वरूप का दर्शन होता है।

श्रीमती प्रमोदिनी पण्डा द्वारा लिखित ''वेदकालीन नारी शिक्षा'' ग्रन्थ भारतीय दृष्टि को न केवल पोषित करता है अपितु उन भ्रान्तियों को भी दूर करता है जो नारी-शिक्षा के प्रति संकीर्ण दृष्टिकोण से उत्पन्न होती हैं। मैं इस लोकोपकृति के लिये विदुषी लेखिका को साधुवाद देता हूँ।

— प्रो० युगलकिशोर मिश्र

सचिव

महर्षि सान्दीपनि राष्ट्रिय

वेद विद्या प्रतिष्ठान

(भारत सरकार)

उज्जैन

।। श्रीः ।।

ॐ सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।

देवा भागं यथापूर्वे सञ्जानाना उपासते।।

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनः यथा वः सुसहासतिः ।।

—ऋग्वेदः—१०-१९१-२,४

—ग्रन्थसङ्केतसूची—

अ० को०	:	अमरकोशः।
अ० वे०	:	अथर्ववेदः।
आश्व० गृ० सू०	:	आश्वलायनगृह्यसूत्रम्।
आप० ध० सू०	:	आपस्तम्बधर्मसूत्रम्।
आ० गृ० सू०	:	आपस्तम्बगृह्यसूत्रम्।
ऐ० आ०	:	ऐतरेय आरण्यकम्।
ऐ० उ०	:	ऐतरेयोपनिषद्।
ऐ० ब्रा०	:	ऐतरेय–ब्राह्मणम्।
ऋ० वे०	:	ऋग्वेदः।
ऋ०वे०भा०भू०	:	ऋग्वेदभाष्य भूमिका।
क० उ०	:	कठोपनिषद्।
का० सं०	:	काठकसंहिता।
के० उ०	:	केनोपनिषत्।
कौ० ब्रा०	:	कौशीतकिब्राह्मणम्।

गो० ब्रा०	:	गोपथब्राह्मणम्।
तै० आ०	:	तैत्तिरीय आरण्यकम्।
तै० ब्रा०	:	तैत्तिरीयब्राह्मणम्।
तै० सं०	:	तैत्तिरीयसंहिता।
बौ० गृ० सू०	:	बौधायनगृह्यसूत्रम्।
बौ० ध० सू०	:	बौधायनधर्मसूत्रम्।
मनु०	:	मनुस्मृतिः।
याज्ञ०	:	याज्ञवल्क्यस्मृतिः।

विषयसारिणी

क्रमाङ्क पत्राङ्क

क्रमाङ्क	विषय	पत्राङ्क
1.	**प्रथमोऽध्यायः**	1
	प्रस्तावना	
2.	**द्वितीयोऽध्यायः**	5
	सम्बन्धसाहित्यावगाहनम्	
3.	**तृतीयोऽध्यायः**	9
	अध्ययनस्यावश्यकता	
	अध्ययनस्योद्देश्यानि	
	शोधप्रबन्धे प्रयुक्तपारिभाषिक-	
	पदानां स्पष्टीकरणम्	
	अध्ययनस्य सीमा	
4.	**चतुर्थोऽध्यायः**	17
	प्राचीनभारते नारीशिक्षा	
	शिक्षायाः महत्वम्	
	स्मृतिकालात्पूर्वं नारीणां शैक्षिकस्थितिः	
	कन्यायाः उपनयनं ब्रह्मचर्यपालनं च	
	स्मृतिकाले नारीशिक्षा	

वैदिकशिक्षायां नारीशिक्षाया: ह्रासस्य कारणम्
स्मृतिकाले शिक्षिता: नार्य:
साहित्यक्षेत्रे नारीणां योगदानम्
साधारणपरिवारे नारीशिक्षा
कलात्मकशिक्षाव्यवस्था
राजपरिवारेषु नारीशिक्षा
शिक्षाया: प्रकारा:
शिक्षाव्यवस्थायां नारीयां योगदानम्
शिक्षणसंस्था:
गुरुकुलम्
गुरुकुलस्य महत्त्वम्
गुरुकुलस्य स्थानम्
नारीणां कृते शिक्षणसंस्था:
छात्रावासस्य व्यवस्था
शिक्षणविषया:
स्त्रीशिक्षाया: विषया:
5. **पञ्चमोऽध्याय:** 77
उपसंहार:
भाविशोधकर्तृणां कृते सूचना:
सहायकग्रन्थानां सूची

प्रथमोऽध्यायः

वेदकालीनशिक्षाव्यवस्थायां नारीशिक्षा

प्रस्तावना (INTRODUCTION)

स्वयम्भूब्रह्माणं विहायास्यां सृष्ट्यां न कोऽपि जीवो वर्तते यस्य जन्म नारीसहायतां विना अभूत्। निखिलेऽस्मिन् जगति जनसंख्यादृष्ट्या नारीणां संख्या पुरुषतुलनया न्यूना न भवति। मानवतादृष्टयां नार्यपि समानाधिकारिणी भवति। अतो मानवसमाजस्य समुन्नतिः सन्निहिता वर्तते नारीनरयोः समानप्रगतौ। न कस्मिन्नपि युगे समाजस्योत्कर्षाय नारीणामवहेलना कृता वर्तते। कुत्रचिन्नारीणां सम्मानमाधिक्येन वर्णितमस्ति; यथा–'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'। किन्तु समयस्य प्रवाहे नारीणां सम्माने उपयोगे चोत्थानं पतनं चावलोक्यते। ज्ञानमार्गे विकासशीलजातिष्वाद्या आर्यजातिर्भवति। आर्यसभ्यतायां नारीणां स्थानं कीदृशमासीत् तज्ज्ञातुं तत्कालीनसाहित्य–

स्यानुशीलनमावश्यकम्। वेदादारभ्य लौकिकसाहित्यं यावद् रचितेषु ग्रन्थेषु सर्वत्र सामाजिकार्थिकराजनैतिकस्थितीनां स्वरूपं ज्ञातुं शक्यते।

'वेदोऽखिलो धर्ममूलम्' इति मनुवचनानुसारं वेदो मानवजातेः धर्मपथप्रदर्शको भवति। प्रभुसम्मितकाव्यत्वात्तद्वर्णिताः सर्वे उपदेशा अस्माभिर्ग्राह्याः भवन्ति। कर्मोपासनाज्ञानानि वेदस्य मुख्यविषयत्वेन गणितानि। 'त्रैगुण्यविषया वेदा' इति गीतावचनमेतत् प्रमाणीकरोति। एतेषां वर्णनावसरे नारीविषयिकी चर्चा इतस्ततः कृता वर्तते। इतरवेदतुलनया ऋग्वेदे नारीणां वर्णनमधिकतया भाति।

ऋग्वेदे विंशतिसंख्यकानां नारीकवीनां वर्णनं दृश्यते। तासु विश्ववारा-सिकता-निवावरी-घोषा-रोमशा-लोपमुद्रा-अपालाः इत्यादयः प्रमुखाः भवन्ति। नारी- ऋषीणां प्रतिष्ठाविषये उक्तमस्ति यत्-

"यथासिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा।
एवं त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य च॥[1]

अस्मान्मन्त्राद् वेदकालीननारीणां कियत्सम्मानमासीत् तदनुमातुं शक्यते। विवाहानन्तरं श्वशुरालयपरिवारस्य सर्वे

सदस्यास्तां नवपरिणितां हृदयसाम्राज्ञीत्वेन स्वीकुर्वन्ति।[2] गृहस्य वयोवृद्धास्त्री देवीतुल्या भवति। सर्वेषामुपरि तस्याः प्रभावो वरीवर्तते।

'न गृहं गृहमुच्यते गृहिणी गृहमुच्यते' इति भावना न केवलमधुनातनयुगेऽपि तु वैदिकयुगे प्रसिद्धाऽऽसीत्। यज्ञकार्यसम्पादनेऽपत्नीकस्याधिकारो नासीत्।[3] वैदिक-ऋषयः नारीणां गुणविषये नित्यं स्तुवन्ति स्म। सा एव विभिन्नस्थलेषु आदर्शमातुः भगिन्याः भार्यायाः कन्यायाश्च दायित्वं निर्वहति। वैदिक-ऋषिसदृशाः काश्चन स्त्रियोऽपि क्रान्तदर्शिन्यः आसन्। स्वाध्यात्मदृष्टिद्वारा ताः वेदमन्त्राणां दर्शनं कृतवत्यः।

पुरा बालिकानामपि वेदमन्त्रपाठपूर्वकमुपनयनसंस्कारः कार्यते स्म। विभिन्नस्मृतिग्रन्थेषु संस्कारप्रकारो वर्णितोऽस्ति। कन्या ब्रह्मचर्यव्रतपालनपूर्वकं स्वयोग्यं वरमाप्नोति। ''ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्[4] इति। उपनयनस्यानन्तरं बौद्धिकविकासार्थं पुरुषब्रह्मचारिवत् बालिकानामपि विद्याभ्यासः प्रचलित आसीत्। वेदकाले स्त्रीछात्राणां विभागद्वयमासीत्। द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योद्वाहाश्च। तत्र ब्रह्मवादिनीनामग्नीन्धनं

वेदाध्ययनं स्वगृहे च भैक्षचर्येति। सद्योद्वाहाः स्त्रियः ब्रह्मचर्यात्परं विवाहं कृत्वा ग्रार्हस्थजीवनमभिमण्डयन्ति। आसां विवाहवयः षोडशं सप्तदशं वा भवति। स्वपत्युः धार्मिककृत्येषु अग्न्याधानादिकार्येषु च सा परमसहायिका भवति। ब्रह्मवादिन्यः ब्रह्मचिन्तनं कृत्वा तपःपूतजीवनं यापयन्ति। आध्यात्मानुभूतिद्वारा ब्रह्मतत्त्वसम्बन्धिदार्शनिक-व्याख्यानं कृत्वा समाजस्योपस्कारका भवन्ति।

उपर्युक्तकारणैर्नारीणां विशिष्टं महत्वं वेदकाले आसीदिति निश्चप्रचं वक्तुं शक्यते। तासां कृते तत्काले कीदृशी शिक्षाव्यवस्थाऽऽसीदिति ज्ञातुं मनसि कौतुहलं समजनि। तदर्थं विषयोऽयमध्ययनाय स्वीकृतः।

---

1. अथर्ववेदः- १४-१-४३
2. यथैवादः स्नुषु श्वशूराल्लज्जमाना विलीयमानैति'

   -काठकसंहिता-३१-१
3. अयज्ञो वा ह्येष योऽपत्नीकः- तै० ब्रा० २-२-२-६
4. अ० वे०, - ११-५-१८

❑❑

द्वितीयोऽध्यायः

सम्बद्धसाहित्यावगाहनम्

पुरुषार्थचतुष्टयसाधनं वैदिककाले शिक्षाया उद्देश्यमासीत्। मोक्षप्राप्तिरेव जीवनस्य चरमलक्ष्यरूपेण गणितम्। इदानीं बौद्धिकविकासेन साकं सामाजिकार्थिक-सांस्कृतिकविकासा अपि शिक्षाया उद्देश्यं भवति। समाजे आत्मानं समन्वयितुं मानवः स्वयोग्यतानुरूपं किमपि कौशलं प्रदर्शयति। तदर्थं शिक्षां साधनरूपेण स्वीकरोति। अधुना वैज्ञानिके युगे केवलं भौतिकोपलब्धयो दृश्यन्ते। अतस्तदनुसारं शिक्षणप्रक्रियायां सर्वत्र परिवर्तनमनुभूयते। सुतरां शिक्षाव्यवस्थायां बह्व्यः समस्याः दृश्यन्ते। आध्यात्मिकचिन्तन-चरित्रनिर्माण-सांस्कृतिक-विकासा-दीनि शिक्षायाः मूलभूतोद्देश्यानि दूरं गतानि। शिक्षायाः संख्यात्मकप्रगतिं दृष्ट्वा सर्वे बुद्धिजीविनोऽसन्तुष्टाः। अध्ययनात्परं छात्रा विपथगामिनो भवन्ति। परन्त्वेतद्देशः कथमासीत्-

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

इदानीं देशस्य नैतिकपतनं दृष्ट्वा सर्वे हितचिन्तकाः पुनर्देशस्य पूर्वगौरवं प्रदर्शयितुमिच्छुकाः सन्तः शिक्षायां परिवर्तनमिच्छन्ति। समनुरूपं ते नारीशिक्षायाः कृते विशेष जागरुकाः भवन्ति। वेदकाले नारीशिक्षायाः कीदृशं स्वरूपं किमुद्देश्यं कश्च विधिः का च प्रणाली आसन् तदवगाहनेनैव किमुचितं किमनुचिनं तज्ज्ञातुं शक्यते। अतोऽस्य शोधप्रबन्धस्य लेखनारम्भात्पूर्वं मयाऽधोलिखितप्रमुखशोधग्रन्थाः शोधनिबन्धाश्चापाठि।

1955 तमे वर्षे मोतिलालबनारसीदास प्रकाशितं प्रो० इन्द्रमहोदयेन लिखितं 'The Status of Women in Ancient India' नामाख्यं पुस्तकमधीतम्। तत्र नारीणां सामाजिक-राजनैतिक-सांस्कृतिकपरिस्थितयः कीदृश्यः आसन् तज्ज्ञातम्।

1980 तमे ख्रीष्टाब्दे वाराणस्यां प्रकाशितं डॉ० अनन्तसदाशिव-अलतेकरमहोदयेन विलिखितं प्राचीन-भारतीयशिक्षापद्धतेः संशोधितं संस्करणं पठितम्। तत्र नवमाध्याये लिखिता नारीशिक्षेति विषयोऽतीव रुचिकर

आसीत्। पुनश्च तद्विरचितं-'The Position of Women is Ancient India' इत्याख्यं पुस्तकमधीत्य बहुसामग्री आसादिता।

डॉ० लतासिंहलमहोदयया विरचिंतं "स्मृति ग्रन्थों के विशेष सन्दर्भ में भारतीयसंस्कृतिमें नारी" इति पुस्तकं पठितवती। स्मृतिग्रन्थेषु नारीणां स्थितिविषये ज्ञात्वा मम शोधप्रबन्धविलेखनाय अनेका: प्रेरणा आसादिता:।

आचार्यबलदेव-उपाध्यायविरचितस्य 1980 तमे ख्रीष्टाब्दे वाराणस्यां प्रकाशितस्य "वैदिकसाहित्य और संस्कृति" इत्याख्यपुस्तकस्यालोडनं कृतम्। अस्मात् विस्तृतरूपेण वैदिककाले रचितानां ग्रन्थानां संस्कृतेश्च विषये बहुज्ञानं लब्धम्।

शोधकार्यस्य नियमान् न ज्ञात्वा शोधकार्यं साधयितुं न शक्यते इति मत्वा 1983 वर्षे हिमाचलविश्वविद्यालयद्वारा प्रकाशितं गवेषणसम्बन्धितं ' Methodology of Educational Reasearch' नामोपेतं पुस्तकमधीतम्।

भारतीयसंस्कृतिविषये वैदेशिकविदुषां किं मतमिति ज्ञातुं प्रो० Winternitz प्रणीतं 'History of Indian Literature' नामाख्यं ग्रन्थमहमधीतवती।

एतान् ग्रन्थान् विहाय मम शोधनिबन्धसम्बद्धा अनेके मूलग्रन्थाः पठिताः। ते निम्नानुसारं भवन्ति। ऋग्यजुःसामाथर्ववेदाः ब्राह्मणग्रन्थाः, उपनिषद्ग्रन्थाः, सूत्रसाहित्यानि, धर्मशास्त्रग्रन्थाश्च। एतेषां प्रकाशनसंस्करणविषयिणी सूचना अनुक्रमणिकायां दर्शिता वर्तते।

❐ ❐

---

1. मनु० 1/20

तृतीयोऽध्यायः

अध्ययनस्यावश्यकता

विंशतिशताब्द्यां तत्पूर्ववर्तिकालेषु च वैदिकवाङ्मयस्योपरि अनेके ग्रन्थाः रचिताः। नारीशिक्षामधिकृत्य केचन विद्वांसः ग्रन्थान् लिखितवन्तः। आधुनिकशिक्षाशास्त्रिभिरपि वैदिकशिक्षाविषये केचन ग्रन्थाः निरमायि। प्रायो ममाधीतेषु सर्वेषु तादृशेषु ग्रन्थेषु नारीशिक्षा स्तोकेन प्रदर्शिता वर्तते। नारीणां शिक्षाविषये अध्यापनविधिविषये च कुत्रापि विपुलेन वर्णनं न दृश्यते।

राष्ट्रस्योद्देश्येन साकं शिक्षाया उद्देश्यमिदानीमाधुनिकयुगे ओतप्रोतंमस्ति। शिक्षायाः लक्ष्यं सामाजिकलक्ष्यमेव भवति। तन्मध्य एव व्यक्तित्वस्य विकासो जायते। तदनुसारं शिक्षणविधौ शिक्षाप्रणाल्यां च परिवर्तनं दृश्यते। अतीतस्य भित्तेरुपरि आधुनिकतायाः सौधो निर्मीयते। पुरातनकालो वेदसमय एव। अतः वेदकालीनशिक्षाव्यवस्थायां नारीशिक्षाव्यवस्था कथमासी-

त्तज्ज्ञायते चेदावश्यकतानुसारं व्यवस्थायां परिवर्तनं कर्तुं शक्यते। अतः मया शोधस्य कृते 'वेदकालीननारीशिक्षा' इति विषयः स्वीकृतः।

अध्ययनस्योद्देश्यानि

१. वेदकालीनशिक्षाव्यवस्थाया अध्ययनम्।

२. वेदकालीनसामाजिक-सांस्कृतिक-धार्मिक-राजनैतिक-व्यवस्थानामध्ययनम्।

३. वेदकालीनशिक्षाव्यवस्थायांनारीणां स्थाननिरूपणम्।

४. वेदकालीनशिक्षणसंस्थानां विषये ज्ञानम्।

५. वेदकालीनशिक्षणविधीनां विषये ज्ञानम्।

६. धर्मशास्त्रदृष्ट्या नारीणां संस्कारविषये ज्ञानाहरणम्।

७. प्राचीनशिक्षणविधिभिः सह नूतनशिक्षणविधीनामध्ययनम्।

८. वेदकालीनशिक्षाया उद्देश्यविषयेऽध्ययनम्।

९. वेदकाले नारीणां समस्या, तदध्ययनञ्च।

१०. वर्तमानकाले नारीशिक्षाव्यवस्थाया अध्ययनम्।

११. वर्तमानकाले नारीणां सामाजिकस्थिती-
नामध्ययनम्।

१२. वेदकालीननारीशिक्षाव्यवस्थया सह वर्तमाननारी-
शिक्षा-व्यवस्थायास्तुलनात्मकमध्ययनम्।

शोधप्रबन्धे प्रयुक्तपारिभाषिकपदानां स्पष्टीकरणम्-

१. **वेदकालः** (2500 B. C -500 B.C)
वेदानां संग्रहसमयः।

२. **शिक्षा** विभिन्नौपचारिकी अनौपचारिकी शिक्षा च।

३. **वेदकालीनशिक्षा** वेदेषु तदङ्गेषु च प्रदर्शिता औपचारिकी अनौपचारिकी च शिक्षा।

४. **विधिः** पठनपाठनविधिः।

५. **गुरुकुलप्रणाली** आश्रमगुरुगृह-मठाग्रहारादिषु प्रचलन्तः शिक्षणविधयः।

६. **मठः** विभिन्नहिन्दूधर्माचार्याणामास्थानम्।

७. **अग्रहारः** विदुषामध्यापकानां सामूहिकवसतिः।

[अग्रं प्रथमं ह्रियते उत्पन्नशस्यादुद्धृत्य स्थाप्यते

(हृ कर्मणि घञ्) क्षेत्रोत्पन्नशस्यादुद्धृत्य ब्राह्मणोद्देशेन स्थाप्ये धान्यादौ गुरुकुलादावृत्तब्रह्मचारिणे देये क्षेत्रादौ ग्रामभेदे च।]

८. **आश्रमः** विद्याध्ययनस्य स्थानम्। विशेषतः सन्यासिनां ब्रह्मचारिणाञ्च।

९. **ब्रह्मचारी** वेदाध्ययनस्य छात्रः। ब्रह्म-वेदस्तद्ग्रहणार्थं चरति व्रतभेदः (चर्+णिनि)। उपनयनानन्तरमाद्याश्रमयुते द्विजातौ उपचारात् तदाश्रमे च।

१०. **ब्रह्मचारिणी** वेदेषु चरते यस्मात् तेन सा ब्रह्मचारिणी। निरुक्तियुक्तायां वेदमात्रगम्यायां यिच्छक्तिरूपायाम्।

"आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्।।[1]"

११. **कुलपतिः** आश्रमाधिपतिः।

मुनीनां दशसाहस्त्रं योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः।।

१२. **अन्तेवासी** आवासीयछात्रः। अन्ते निकटे

विद्याग्रहणाय वसति (वस्+णिनि)। "शिष्ये याज्यान्तेवासिनोर्वापि न त्वन्यत् इति स्थितिरिति" मनुः। तैत्तिरीयोपनिषदिआचार्यपूर्वरूपम्। अन्तेवास्युत्तररूपम्।[2] इति।

१३. **आचार्यः**

(क) **उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।**
संकल्पं सरहस्यं च तमाचार्यं प्रचक्षते[3]"॥

(ख) कस्मादाचार्य आचारं ग्राहयत्याचिनोत्यर्था-नाचिनोति बुद्धिमिति वा।[4]

(ग) **आचिनोति च शास्त्रार्थान् आचार्ये स्थापयत्यपि।**
स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते॥[5]

(घ) **संस्थानाध्ययिनः आचार्याः पूर्वं बभूवुः।**
श्रवणादेव प्रतिपद्यन्ते न कारणं पृच्छन्ति॥[6]

(ङ) **स्वयमाचरति यस्मात् आचारं स्थापयत्यपि।**
आचिनोति च शास्त्रार्थान् यमैः सनियमैर्युतः॥[7]

(च) **आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया।**
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च।[8]

(छ) इह आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षेऽथ संपत्स्ये।[9]

(ज) आचार्यः स च विज्ञेयः सर्वतन्त्रेषु निर्णयः।[10]

(झ) आचार्यो वेदसम्पन्ने विष्णुभक्तो विमत्सरः।
योगज्ञः योगनिष्ठश्च सदा योगात्मकः शुचिः॥[11]

१४. उपाध्यायः

कनिष्ठोऽध्यापकः। उपेत्याधीयतेऽस्मात्। उप+अधि+इङ्+घञ्।

"एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यायति वृत्यर्थमुपाध्यायः स उच्यते॥[12]

इति मनूक्तलक्षणे वेदैकदेशतदङ्गाध्यापकः।

१५. उपनयनम्

आचार्येण ब्रह्मविद्यायाः अध्यापनाय विद्यार्थिनः शिष्यभावेन स्वीकरणमुपनयनम्। उपनयनस्यापरं नामाचार्यकरणमस्ति।[13] अध्ययनारम्भसंस्कारः। उपनयने गृह्योक्तकर्मणा येन समीपं नीयते गुरोः। उपनयनसंस्कारे स्वीकरणंमाध्यमेन विद्यार्थी तस्याचार्यस्य पुत्ररूपेण पुनरजायत। पुत्रकरणस्येयं प्रक्रियाऽथर्ववेदे प्रथमं वर्णितम्–

'आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः। तं रात्रीस्तिस्त्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवा।।[14] बाले वेदाय तद्योगादबालस्योपनयनं विदुरिति स्मृत्युक्ते। ब्राह्मणक्षत्रियवैश्यानां यज्ञसूत्रधारणरूपप्रधानसंस्कारः।

१६. **समावर्तनम्** आचार्याश्रमेऽध्ययनं परिसमाप्य प्रायशो विद्यार्थिनः स्वगृहमागच्छन्। आश्रमाद् गृहागमनं समावर्तनम् , सत्रसमापनसमारोहो वा। समावर्तते गुरुकुलादनेन सम+आ+वृत्त+कारणे ल्युट्। वेदाध्ययनानन्तरं गार्हस्थाय गुरुकुलादागमनहेतुके संस्कारभेदे तद्विधिः।

अध्ययनस्य सीमा

वेदकालीनशिक्षणव्यवस्थायां नारीशिक्षायाः समीक्षात्मकमध्ययनमिति विषयस्य उचार्यमाणे सति अस्य परिसरो वैदिकवाङ्मयमतिरिच्य न गच्छति। अत ऋग्वेदादारभ्य स्मृतिसाहित्यं यावन्मया निबन्धेऽस्मिन् चर्चा कृता। संक्षेपेण वेदवेदाङ्गब्राह्मणारण्यकोपनिषद्धर्मसूत्रगृह्यसूत्रस्मृतिग्रन्थेषु वर्णितानि नारीशिक्षासम्बन्धीनि विषयवस्तूनि स्वीकृतानि। विभिन्नग्रन्थेषु वर्णितानां शिक्षाव्यवस्थानां तुलनात्मकमध्ययनमपि विहितम्।

न केवलमस्य शोधनिबन्धस्य लेखने मूलग्रन्थाः

व्यवहृताः, अपितु वैदिकसाहित्यमधिकृत्य ये च समालोचनात्मकाः ग्रन्थाः मम दृष्टिपथे आगताः तेषामप्यध्ययनं कृतम्। प्राच्यविचारानधिकृत्य पाश्चात्त्य-विदुषां च दृष्टिभङ्गिर्वर्तते, तदपि मया मध्ये मध्ये सूचिता।

---

1. मनु० -५-१५८
2. तै० उ० -(शिक्षावल्ली) ३-२,३
3. मनु०- २-१४०
4. निरुक्त (दूर्गाचार्यटीका) १.४
5. आप० ध० सू० - १-१-१४
6. गो० ब्रा० (पूर्व) १.२७
7. वायु० पु० ५९-३०
8. नीलकण्ठस्मृतिः -
9. छा० उ०-६-१४-२
10. गायत्रीतन्त्रम्- १-१२३
11. अद्वयतारकोपनिषद्
12. मनु०-२.१४१
13. पाणिनी-१-३-३६,
14. अ० वे० ११-५-३

❑ ❑

चतुर्थोऽध्यायः

प्राचीनभारते नारीशिक्षा

प्राचीनभारते वेदानां वेदाङ्गानां चाध्ययनं मुख्यरूपेण प्रचलितमासीत्। एतदध्ययनं केवलमुच्चवर्णानां कृते सीमितमिति निश्चप्रचं प्रचीनसाहित्याध्ययनादेव भाति। तथापि स्त्रीणामध्ययने स्वातन्त्र्यं दत्तमिति केषुचित्स्थलेषु वर्णितमस्ति। कासाञ्चननारीऋषीणां वेदाध्ययनं यज्ञकार्य-सम्पादनं वेदप्रचारकर्म च जीवनस्य लक्ष्यमासीत्। एतासु कतिपयानां नामानि गण्यन्ते। ऋग्वेदस्य मन्त्रद्रष्टृषु घोषालोपामुद्रा[1]-ममतोपाला-सूर्या-इन्द्राणी-शची-सर्पराज्ञी-विश्ववारा च प्रामुख्येनासन्।[2] मैकडोनाल्डमहोदयानां मतेन विश्ववारा न केवलमेका नारी-ऋषिः, अपितु एका ऋत्विक्त्वेन सा खलु बहूनां यज्ञानामाधानमकरोत्।[3] ब्रह्मचर्यनियमपालनपूर्वकं कठोरशपथं नीत्वा वेदानां वेदाङ्गानां चाध्ययनक्रम आरभ्यते। ब्रह्मचर्याश्रमस्यायमारम्भ काल एव। आश्रमे प्रवेशात्पूर्वं यज्ञोपवीतसंस्कारो विधीयते।

अयं संस्कारः स्वशाखानुसारं संपत्स्यते। तदुपरान्तं ब्रह्मचारी आचार्यस्य समीपे नीयते वेदारम्भाय। याः नारीब्रह्मचारिण्योऽभवन्, तासां च भिन्न-भिन्नशाखानुसारमुपनयनं जायते स्म। अतो नार्योऽपि अध्ययनकर्मणि पुरुषवत् सौकर्यं लभन्ते स्म। स्वसम्प्रदायानुसारं नारीणां कृते स्वतन्त्रगुरुकुलव्यवस्था नासीत्। ब्रह्मचारिण्यः स्वभातृब्रह्मचारिभिः सहाध्ययनमकुर्वन्निति रामायणानुशीलनेन ज्ञातं भवति। यथा कुशलवाभ्यां सह आत्रेयी वाल्मीकिगुरुकुले वेदान्तमधीतवती। ब्रह्मचर्यस्य पालनं नारीपुरुषाभ्यां समानरूपेणावश्यमेव करणीयम्। नियमानुसारं ब्रह्मचर्याश्रमस्य पालनानन्तरमेव नारी विवाहाय योग्या भवति।[5]

उपनयनस्य यज्ञोपवीतधारणमेकं लक्षणं भवति। स्त्रीणामपि एतद्धारणेऽधिकारोऽस्तीति गोभिलगृह्यसूत्रे स्पष्टं भणितम्।[6] पुरोहितः सुशोभितवस्त्रावृत्तां ज्ञोपवेष्टितां कन्यां मन्त्रोच्चारणार्थं वेदिकायामुपस्थापयति। स्त्रिय उपनीताः सत्यः वेदाध्ययनाय गुरुसमीपं गच्छन्तीति पारस्करगृह्यसूत्रे उक्तमस्ति।

हारितमतानुसारं स्त्रीणां भेदद्वयमस्ति। ब्रह्मवादिन्यः सद्यबध्वश्च। ब्रह्मवादिन्यः आजीवनं ब्रह्मचर्यव्रतं

पालयित्वा वेदाध्ययनं शास्त्राध्ययनं च कुर्वन्ति। अपराः बाल्यकालादेव विवाहं कृत्वा गार्हस्थ्यधर्मान् पालयन्ति।

ये विद्वांसः खलु स्त्रीणां वेदाध्ययनाधिकारं नानुमन्यन्ते ते सूत्रसाहित्यस्यास्याः पङ्क्तेऽर्थकरणे कष्टमनुभवन्ति। सा पङ्क्तिरित्थं भवति 'इमं मन्त्रं पत्नी पठेत्।[7]

शिक्षायाः महत्वम्

कस्यापि देशस्य सामाजस्य वा सांस्कृतिक-बौद्धिकवैज्ञानिकप्रगतिः तस्य देशस्य समाजस्य वा शैक्षिकस्थित्युपरि आधारिता भवति। शिक्षया समाजस्य व्यक्तित्वस्य निर्माणं भवति। पुनश्च समाजः व्यक्त्युपरि आश्रितो भवति। अत एव समाजस्य विकासाय एतदावश्यकं भवति यत् प्रत्येकं व्यक्तेः सुगठितविकासः स्यात्। तत्तदा सम्भवो भवति यदा सर्वसाधारणाय उच्चशिक्षायाः सम्यक् प्रबन्धो भवति।

शिक्षाशब्दस्य व्युत्पत्तिलभ्यार्थो भवति अभ्यासः, विशेषव्यक्तिः, इच्छाविशेषः तथा सहनशक्तेरिच्छा अर्थात् सुखदुःखप्रियाप्रियान्तर्द्वन्द्वेषु विचारपूर्वकं सहनशक्तेः प्रदर्शनम्।[8]

किम्वदन्त्यनुसारं विभिन्नशास्त्राध्ययनानन्तरं यदि

व्यक्तौ अन्तर्दृष्टेः विकासो न भवति, स अन्तर्ज्योतिं नैव प्राप्नोति तर्हि स मूर्खो भवति। वस्तुतः क्रियावान् पुरुषः केवलं शिक्षितो भवति –

शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान्पुरुषः स एव।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम्।[9]

अतः पुरुषवत् स्त्रीणां कृतेऽपि शिक्षायाः सम्यक् व्यवस्थायाः आवश्यकता स्वाभाविकी भवति यतोहि समाजस्य प्रगतये स्त्रियः पुरुषाश्च मिलित्वा उपकुर्वन्ति। परन्तु स्त्रीणां एकविधा प्रणाली कस्यापि देशस्येतिहासावलोकनेनैकस्मिन् समये न दृश्यते। समयानुसारं शिक्षाया उत्थानं पतनं च भवति। तस्य प्रभावः पुरुषाणां शिक्षाया उपरि न्यूनातिन्यूनं पतति। बालकाय सम्यक् शिक्षादानं पित्रोः कर्तव्यं भवति। प्राचीनभारतवर्षे बहुकालं यावत् पुत्रवत् पुत्रीणां शिक्षाविषये पित्रोः रुचिरासीत्। स्त्रीणां कृते शिक्षाया महती आवश्यकता एतस्मात्कारणाद् वर्तते यत् ता एव समये प्राप्ते मातरो भवन्ति। यथा मातरो भवन्ति, तथैव तासां सन्ततिर्भवति। यदि मातरोऽशिक्षिताः विद्याशून्याः कर्तव्यज्ञानहीनाश्च स्युः तर्हि पुत्राः पुत्र्यश्च तद्वत् अविद्याग्रस्ताः अकुशलाः

नीतिहीनाश्च भविष्यन्ति। अतः महानिर्वाणतन्त्रे कथितमस्ति 'कन्याऽप्येवं लालनीया शिक्षणीया प्रयत्नतः' इति।

वस्तुतः शिक्षासंस्कारेण उभयोः स्त्रिपुरुषयोः समाजे समुचितस्थानं स्यात्। नीतिकारानुसारं शिक्षासंस्कारात्पूर्वं ब्राह्मणः शूद्रवद्भवति। परन्तु संस्कारादनन्तरं स द्विजः कथ्यते। संस्कारादनन्तरं तस्मै या शिक्षा दीयते तया तस्याचरणं शुद्धं सुसंस्कृतं च भवति।

'जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते'[10]

शिक्षया यज्ज्ञानं लभ्यते, तेन एकस्य बुद्धेः शक्तेः कार्यक्षमतायाः च वृद्धिर्भवति। शिक्षिता एव जना देशसेवां राष्ट्ररक्षां राष्ट्रसंचालनं पठनं पाठनं गृहस्योत्तमभरणपोषणं विज्ञानस्योन्नतिं च कुर्वन्ति। यथा पुरुषेभ्यः शिक्षा श्रेयस्करी वर्तते, तथैव स्त्रीभ्योऽपि शिक्षायाः महत्वं वरीवर्ति।

स्मृतिकालात्पूर्वं नारीणां शैक्षिकस्थितिः

प्राचीनभारतीयसभ्यतायाः अवलोकनेन ज्ञायते यत् पुरुषवत् स्त्रियोऽपि उच्चवैदिकशिक्षामलभन्त। शिक्षा नाम वैदिकशिक्षा एव आसीत्। यज्ञस्य धार्मिकानुष्ठानस्य महत्वमासीत्। यज्ञादिधार्मिककार्यं वेदोपरि आधारितं

भवति। अतः यज्ञानुष्ठानाय वैदिकज्ञानस्य आवश्यकता अवश्यमासीत्।

२०० ई० पू० यावत् स्त्रियः वेदाध्ययनस्य यज्ञानुष्ठानस्याधिकारं प्राप्तवत्यः। पत्न्या साकमेव पुरुषः यज्ञानुष्ठानं कर्तुं समर्थः आसीत्।[11] यज्ञकर्माणि उभयोः आवश्यकम्।[12]

पत्नीति शब्दः यज्ञकर्मणि पत्या सह सम्बन्धं प्रकटयति।[13] प्राचीनकालात् परम्परानुसारं नार्यः लवण-यज्ञकर्मणि नियुक्ता आसन्।[14] रामचन्द्रस्य यौवराज्याभिषेकसमये मात्रा कौशल्यया, बालिनः युद्धाय प्रस्थानकाले तस्य पत्न्या तारया यज्ञानुष्ठानं, पुनश्च तयोः कृते मन्त्रवित्[15] शब्दस्य प्रयोगः रामायणे दृश्यते। अशोकवाटिकायां जानकी सन्ध्यावन्दनं कृतवती।[16] महाभारते 'कुन्ती' अथर्ववेदे प्रवीणा आसीत्।[17]

अस्मात् ज्ञायते यत् प्राचीनभारतवर्षे नार्यः साधिकारं यज्ञानुष्ठानं कृतवत्यः। एवं दृश्यते यत् कारणवशाद्यदि पतिः समीपे न भवति स्म, तर्हि सा एकाकिनी यज्ञं सम्पादयितुं समर्था आसीत्। अलतेकरमहाभागः एवं चतुर्विधयज्ञानुष्ठानस्योल्लेखं करोति। यस्य सम्पादनं केवलं नार्यः कुर्वन्ति स्म।[18]

कन्याया उपनयनं ब्रह्मचर्यपालनञ्च

उपनयनसंस्कारयुक्तः जनः यज्ञादिवैदिककर्म सम्पादयितुं समर्थ आसीत्। वैदिककाले विद्यार्थिनीनां कन्यकानामुपनयनं क्रियते स्म। ईदृशीनां कन्यकानां संख्या तदानीमपि निःसंशयमेव नासीदधिका। परवर्त्तियुगे तासां संख्या स्वल्पतरा बभूव। कन्यकानामुपनयनं केवलं विवाहकाले धार्मिकविधानस्य पूर्त्तये क्रियते स्म।[19] उपनयनस्य पश्चात् गुरु शिष्यं शौचमाचारमग्निकार्यं सन्ध्योपासनं च प्रथममशिक्षयत। ततः परं वेदस्याध्ययनं चतुर्विंशतिपर्यन्तं ब्रह्मचर्यपालनपूर्वकमध्यापयति स्म। पञ्चविंशतितमे समावर्तनसंस्कारः जायते स्म। अतः स्त्रियोऽपि ब्रह्मचर्यपालनं कृत्वा युवपतिं विन्दन्ते स्म।[20]

मनुसमये (200 ई० पू०) उपनयनकर्मणि कन्यानां स्वतन्त्रता आसीत्। परवर्तिकाले कन्यानामुपनयनं सम्पूर्णतया निषिद्धं जातम्। अतः अष्टमशताब्द्यां यमनामकः स्मृतिकारः उपनयनसंस्कारं प्राचीनकालस्य प्रथारूपेण वर्णितवान्। तस्मात् ज्ञायते यत् बालकबालिकयोः उपनयनसंस्कारोऽभवत्। अन्तरमासीत् यद् बालकः शिक्षालाभार्थं गुरुकुलम गच्छत् , कन्या गृहे

स्थित्वा पितुः गुरुजनेभ्यो वा शिक्षां प्राप्तवती। पुनश्च बालकः शिक्षानिमित्तं गृहाद्गृहमटन् आसीत्। कन्या गृहे तद्व्रतं सम्पादितवती।[21]

नार्यः द्विधा विभक्ता आसन्- सद्योवधूः ब्रह्मवादिनी च। तदानीं बाल्यविवाहस्य प्रचलनं नासीत्। सर्वा उपनयनानन्तरं यज्ञादिवैदिककर्मानुष्ठानविषये ज्ञानं प्राप्तवत्यः। एवं षोडशवर्षेभ्यः अनन्तरं कासांचन विवाहकार्यमक्रियत। ताः 'सद्योवधू' नाम्ना परिचिता आसन्। अन्या ब्रह्मवादिनीति कथ्यते स्म, या खलु दीर्घकालं यावत् अध्ययनरता आसन्।[22] ताः प्रौढाः स्वेच्छानुसारं विवाहमकुर्वन्। अथवा आजीवनमविवाहिता सत्यः अध्ययने प्रवृत्ता आसन्। वैदिककाले एवं नार्यः स्वतन्त्रतां प्राप्तवत्यः। स्वबुद्ध्या समाजं साहित्यं च समृद्धं कृतवत्यः। ऋग्वेदे विंशतिनारीकवीनां नामोल्लेखः विद्यते, यासु विश्व वारा, सिकता, लोपामुद्रा, घोषा, अपाला, रोमशा तथा उर्वशी प्रमुखा भवन्ति।

काशकृत्स्नी मीमांसापुस्तकं लिखितवती। याः छात्राः मीमांसाविषये प्रावीण्यं लभन्ते, ताः काशकृत्स्नाः कथ्यन्ते।[23] याज्ञवल्क्यस्य पत्नी मैत्रेयी सांसारिकवस्तूनि विहाय प्रचलितदर्शनविषये ज्ञानं प्राप्तुमैच्छत्।[24] अपरा

पत्नी गार्गी जनकराजस्य यज्ञावसरे स्वकीयाध्यात्मिकज्ञानस्य प्रमाणं दत्तवती।[25] आत्रेयी वाल्मीकेः अगस्तेश्च वेदान्तशिक्षां प्राप्य विदुषी अभवत्।[26] पुराणकालेष्वपि नार्यः विद्यायां दक्षा आसन्। अस्मिन् प्रसङ्गे राज्ञः दाक्षायणस्य कन्ययोः नाम आगच्छति, ये मीमांसाविषये दर्शनसाहित्ये च दक्षतां प्राप्तवत्यौ।[27]

बुद्धदेवस्यानुमतिं प्राप्य नार्यः बिहारेषु तिष्ठन्ति स्म येन उच्चकुलसम्भूताः कन्याः शिक्षाप्राप्तुं स्ववसरमलभन्त। ब्रह्मचर्यव्रतं धारयन्त्य बह्व्यः नार्यः बौद्धसंघेषु दार्शनिकधार्मिकज्ञानं प्राप्तवत्यः। थेरीगाथायाः बह्व्यः नार्यः निर्वाणं प्राप्तवत्यः।[28] सम्राडशोकस्य पुत्री बौद्धधर्मस्य प्रचारार्थं लंकां गतवती। अस्मात् ज्ञायते यत् स्मृतिकालात्पूर्वं नारीणामुपनयनमभूत्। बाणस्तु कादम्बर्यां तपस्विन्या महाश्वेतायाः वर्णने तस्याः शरीरे ब्रह्मसूत्रस्योल्लेखं करोति। अतः ताः स्वेच्छानुसारं ज्ञानं लब्धुं समर्था आसन्। शिक्षाप्राप्तेः सौविध्यं ब्राह्मणक्षत्रियवैश्यानां कन्याः लब्धवत्यः।

बालविवाहस्य प्रचलनं शिक्षालाभाय सहायतामकरोत्। नारीणां शैक्षिकस्थितिः तथा समीचीनामसीत् यत्एकत्र विदुषीं पुत्रीं कामयमानस्य पितुः वर्णनं दृश्यते।[29]

अत एव प्रचीनशिक्षेतिहासानुसारं हिन्दूसमाजः नारीशिक्षां प्रति उदार आसीत्। परन्तु उत्तरकाले निरुत्साहितमकरोत्। तथा एकस्मिन् समये हस्तकलायाः आदर आसीत्, कालान्तरे तस्याः मूल्यं न्यूनमभूत्।

स्मृतिकाले नारीशिक्षा

मनुस्मृतेः रचनाकाले नारीणां शैक्षिकस्थितौ परिवर्तनमागतम्। तासां शिक्षाग्रहणस्याधिकार आसीत्। परन्तु वेदाध्ययनस्य नासीत्।[30] यद्यपि धर्मसूत्राणां (500 ई० पू०) समये नारीणामुपनयनस्य महत्वं न्यूनं जातं तथापि मनुस्मृतिसमये तस्यौपचारिकमूल्यमासीत्।[31] पुनश्च वेदाध्ययनाद् वञ्चिताः स्त्रियः विवाहसमयं विना अन्यावसरे मन्त्रोच्चारणं नैव कृतवत्यः।[32] तत्परवर्तिकाले याज्ञवल्क्य उपनयनस्यौपचारिकता नारीणां कृते नास्तीति उक्त्वा तस्य सर्वथा बहिष्कारं कृतवान्। गर्भाधानात् चूडाकर्म यावत् संस्काराणामावश्यकता कन्यानां कृतेऽस्ति, परन्तु तेष्ववसरेषु वैदिकमन्त्रोच्चारणस्य आवश्यकता नास्तीति स उक्तवान्।[33] तस्यानुसारं केवलं विवाहसंस्कारः नारीणां कृते वैदिकरीत्या मान्यो भवति।

परिणामतः नारीणामुपनयनसंस्कारः स्थगित अभूत्।

उपनयनाभावात् ताः वैदिकशिक्षालाभाय अधिकारिण्यः नाभवन्। वैदिकज्ञानाभावात् ताः नित्यधार्मिककृत्येषु प्रयुक्तानां वैदिकमन्त्राणां विषये अनभिज्ञा अभवन्।

अतः यज्ञानुष्ठानेषु तस्या उपस्थितिः नाममात्रमभूत्। परवर्तिकाले अतिसायनादयः[34] धर्मप्रवर्तकाः धार्मिककार्येषु तस्याः औपचारिकोपस्थितेः आवश्यकता नास्तीति उक्तवन्तः। एवं याज्ञवल्क्यादनन्तरं सर्वे तस्य मतं स्वीकृतवन्तः। यमादयः स्मृतिकाराः प्राचीनकाले स्त्रीणामुपनयनं स्वीकृतवन्तः। परन्तु तस्यै तदधिकारं पुनः प्रदातुं नैव चेष्टितवन्तः। किमन्यत्, उपनयनाभावेऽपि स्त्रीणां शुद्रत्वेन गणना अभूत्।[35]

वैदिकशिक्षायां नारीशिक्षायाः ह्रासस्य कारणम्

वैदिकशिक्षायाः स्त्रियः वञ्चयितुं ब्राह्मणकाल एव चेष्टा अभूत्। यद्यपि प्राचीनग्रन्थेषु प्रमाणानि न लभ्यन्ते तथापि समस्यानामनुशीलनेन एतत् स्पष्टं भवति। प्रारम्भिककाले वैदिकसाहित्यं विस्तृतं नासीत्। अतः छात्राः कण्ठस्थीकर्तुं समर्था आसन्। कालान्तरे ब्राह्मणारण्यकोपनिषद्ग्रन्थानां विरचनया पुनश्च शाखोपशाखावेदाङ्गानां सम्मेलनेन वैदिकपाठ्यक्रमः

विस्तृतः अभवत्। अत एव तस्य पठनं कष्टकरं दुरुहं दीर्घकालीनं चाभवत्। बालकानां विवाहायुरपेक्षया बालिकानां विवाहायुः न्यूनमासीत्। अतः ताः दीर्घकालं यावत् पठितुमवसरं नैव प्राप्तवत्यः। येन दुरुहं पाठ्यक्रमं धारयितुं ताः असमर्था अभवन्। विवाहादनन्तरं गृहकर्मणि व्यापृताः ताः वेदाभ्यासं कर्तुमवसरं नैव प्राप्तवत्यः। तस्मात् मनुः स्त्रीणां वेदाध्ययनस्य आवश्यकता नास्तीत्युक्तवान् । प्रारम्भिककाले वेदमन्त्राणामुच्चारणोपरि तथा महत्वं न दीयते स्म। कठिनशब्दानामुच्चारणस्थाने जनाः सरलशब्दानामिच्छानुसारं प्रयोगं कर्तुं समर्था आसन्। ते मन्त्रस्य भावार्थं प्रकटयितुं न तु तस्य यथावदनुकरणं कर्तुमैच्छन्।[36]

परवर्तिकाले वेदाः अपौरुषेयरूपेण गृहीता अभवन्। प्रति शब्दं ईश्वरीयमिति मत्वा तस्याक्षुण्णप्रयोगार्थं यतन्ते स्म। पदपाठ-क्रमपाठ-जटापाठ-घनपाठादिनियमेन वेदमन्त्रस्योच्चारणं करणीयमिति नियमः जातः। विश्वासोऽयं संजातः यत् मन्त्रोच्चारणे त्रुटिः भविष्यति, तर्हि फलप्राप्तिः इष्टसिद्धिर्वा नैव भविष्यति; अपितु कर्तुरुपरि दैवकोपो भविष्यतीति,[37] विस्तृतस्य वेदस्य प्रति शब्दं शुद्धोच्चारणं सहजकार्यं नासीत्। तस्य अभ्यासाय

बहुकालस्यापेक्षा आसीत्। कन्यानां पक्षे सर्वथा एतदसम्भवमासीत्। अतः ताभिः त्रुटिपूर्णमुच्चारणं दैवकोपस्य कारणं भविष्यतीति मत्वा ताः वैदिकाध्ययनाद् वारणाय सर्वे ऐच्छन्।

पुनश्च स्त्रीणामध्ययनकार्यं गृहे भवति स्म। गृहकर्मणि नियुक्ताः ताः वेदाध्ययननिमित्तमधिकं समयं नैव लब्धवत्यः। लोकभाषा वैदिकभाषायाः भिन्ना भवति स्म। मनोः समये लोकभाषाया उपरि प्राकृतभाषायाः प्रभावः दृश्यते। अतः बालिकाः संस्कृतभाषायाः शुद्धोच्चारणं कर्तुमसमर्थाः संजाताः। अतः वेदमन्त्रस्य शुद्धोच्चारणस्य रक्षानिमित्तं प्राचीनधर्मकर्तारः स्त्रियः वेदाध्ययनाद् वञ्चयितुं मतं दत्तवन्तः। विवाहावसरेऽपि वध्वाः मन्त्रोच्चारणं यजमानः अकरोत्। तदानी वरः स्वकीयं मन्त्रोच्चारणं स्वयमकरोत्।[38] स्त्रीणां कार्यक्षेत्रं गृहं भवति। गृहकार्यस्य ज्ञानं कन्या मातुः प्राप्नोति। बालकः तदानीं गुरुगृहे तिष्ठन् पञ्चविंशतिवर्षं यावद् वेदाध्ययनविषये स्ववर्णस्य व्यवसायविषये ज्ञानमलभत। गृहाद् बहिःगमनस्य स्त्रीणामावश्यकता नासीत्। सम्भवतः वेदाध्ययनाद् वारणे एतदप्येकं कारणमासीत्।

एवं मनुप्रभृतिस्मृतिकाराणां, स्त्रीणां वेदाध्ययने अनधिकारविषये मतप्रदानं कारणभूतं भवति, न तु पारस्परिकद्वेषभावनया। साहित्यिक-कलात्मकशिक्षालाभाय प्रतिबन्धकः नासीत्। अतः नार्यः साहित्याध्ययने अधिकारिण्यः आसन्। नारीणामुपनयनसंस्कारस्य समाप्तेः दुष्परिणामः तस्याः बाल्यविवाहव्यवस्था अभूत्। अनेन अध्ययनाय प्राप्तः समयः न्यूनातिन्यूनः जातः। प्रथमशताब्द्यां प्रथमरजस्वलनादनन्तरं कन्यायाः विवाहः प्रशंसायोग्यः आसीत्। अतः द्वादशतमे त्रयोदशतमे वा वर्षे कन्यायाः विवाहसमयः परिगणितोऽभूत्।[39] फलतः सा शास्त्रीयज्ञानं नैव प्राप्तवती। अनेन प्रकारेण तस्याः सामाजिकस्थितिः शूद्रेण सह समाना अभवत्। पुनश्च अष्टम-नवमशताब्द्यां स्मृतिकाराः कन्यायाः विवाहायुः दशवर्षेभ्यः पूर्वं स्यादिति मतं दत्तवन्तः। किमधिकेन, समाजे नग्निकायाः (चतुर्वर्षीयबालिकायाः) विवाहः प्रशंसनीयः अभवत्। मनुस्मृत्यनुसारं विवाहकाले विधिहेतोः उपनयनमासीत्। अतः उपनयनवयसि बालिकानां विवाहः प्रचलितोऽभवत्।[40] यस्या विवाहः अष्टमवर्षे नाभवत् , सा द्वे त्रीणि वा वर्षाणि अध्ययनाय प्राप्तवती। तदवसरे तस्याः पिता उपयुक्तपात्रस्यानुसन्धाने

अतिष्ठत्। येन सा सम्यक् ज्ञानं नैव लब्धवती। अतः दशमशताब्द्यां कन्याः अशिक्षिता अभवन्।[41]

मौर्यकालात्पूर्वं बौद्धसंघेषु नारीशिक्षा प्रोत्साहनमलभत। किन्तु चतुर्थशतके तत्रापि स्त्रीशिक्षा समाप्ता सञ्जाता। अतः फाहियान्-यान्-चांगौ चीनपरिव्राजकौ स्वग्रन्थे बौद्धभिक्षुण्याः नामोल्लेखं नैव कृतवन्तौ।

स्मृतिकाले शिक्षिताः नार्यः

यद्यपि स्त्रिशिक्षायाः अवहेला सञ्जाता, तथापि समाजे राजपरिवारस्य राजकर्मचारिपरिवारस्य सम्पन्नपरिवारस्य गणिकापरिवारस्य च नार्यः नवमदशमशताब्दीं यावत् शिक्षामलभन्त। यासु कतिपयाः प्रसिद्धकवयत्र्यः अभवन्।[42] अस्योदाहरणं नाटकेषु दृश्यते। नाटके राजपरिवारोत्पन्ना नार्यः प्रायः शिक्षिताः भवन्ति। यद्यपि एताः नार्यः वैदिकज्ञानलाभाद् वञ्चिता आसन्, तथापि ता संस्कृतप्राकृतसाहित्यस्याध्ययनं सम्यक् कृतवत्यः। शिक्षालाभस्य स्थानमासीद् गृहम्। तत्र गृहकलायाः निपुणतां प्राप्त्यर्थं स्वतन्त्रशिक्षकस्य नियुक्तिः स्थलविशेषेषु अभवत्। राजा अग्निमित्रः गणदत्तस्य हरदत्तस्य च नियुक्तिः नारीणां विशिष्टशिक्षा-

निमित्तमकरोत्। एतौ विशेषतः संगीतनृत्यचित्रकला-गृहसज्जामाल्यगुम्फनादिविषयेषु शिक्षां दत्तवन्तौ।[43]। कामशास्त्रकारस्य वात्स्यायनस्य मतानुसारं नार्यः चतुःषष्टिकलासु निपुणाः स्युः।[44] विवाहानन्तरं शिक्षाप्राप्तिः कतिपयानां पक्षे सम्भवा आसीत्। याः स्त्रियः दीर्घकालं यावत् शिक्षाप्राप्तौ व्यापृता अभवन् , ता साहित्यक्षेत्रे स्वरचनया गौरवं प्राप्तवत्यः।

साहित्यक्षेत्रे नारीणां योगदानम्

स्मृतिकाले शिक्षिताः बह्व्यः नार्यः स्वरचनया साहित्यस्य समृद्धौ सहायतां कृतवत्यः। हालः 'गाथा सप्तशती' संग्रहे यासां दक्षिणभारतीयकवीनां नामोल्लेखमकरोत्, तासु सप्त नारीकवयः प्रमुखा आसन्।[45] राजशेखरः 'सूक्तिमुक्तावली' ग्रन्थे कवयित्रीणां प्रशंसामकरोत्। शीलभट्टारिका नाम्नी नारीकविः पद्ये शब्दार्थयोः साम्यताहेतोः सुन्दरपद्यरचनया व्याख्यानं कृतवती।[46]

गुजरातस्य नारीकविः देवी इदानीमपि सहृदयानां हृदि तिष्ठति।[47] विजया नामिकां नारीकविं कालिदासो बहुमानतया सरस्वत्या सह समत्वं पश्यति।[48] अतः तदानीं

सा विद्वत्सु सम्मानार्हा आसीदिति ज्ञायते। राजशेखरस्य पत्नी क्षत्रिया आलोचिका कवयित्री आसीत्। अलतेकरानुसारं 'कौमुदीमहोत्सवम्' इति नाटकस्य रचना विद्यया विज्जकया वा लेखिकया अभवत्।[49] पाटलिपुत्रस्य राजनैतिकघटना: अत्र आधारभूता: भवन्ति। अत: तदानीं स्त्रीणां राजनीतौ इतिहासे च रूचिरासीदिति ज्ञायते। संस्कृतलोकगाथासु शीला-मारूता-इन्दुलेखा-भवदेवी-विकटनितम्बा-सुभद्राप्रभृतीनां कवयित्रीणा-मुल्लेख: दृश्यते।[50] वादविवादप्रतियोतितास्वपि नारीणां रूचिरासीत्। शंकरमण्डनयोर्मध्ये शास्त्रार्थस्य निर्णायिका मण्डनमिश्रस्य पत्नी भारती आसीत्।[51] अस्मात् सा मीमांसा-वेदान्त-न्यायविषयेषु विदुषी आसीदिति ज्ञायते। आयुर्वेदे स्त्रीचिकित्सासु नारीणां रूचि: आसीत्। अरवीभाषायामष्टमशताब्द्याामनुदितमेकं पुस्तकं लभ्यते यस्य रचयित्री 'रूसा' आसीत्। अस्मिन् धातृकर्मविषये वर्णनमस्ति।[52] द्वादशशताव्द्यां भास्कराचार्य: स्वकन्याया: लीलावत्या: कृते लीलावती नामकस्य गणितशास्त्रस्य रचनामकरोत्। अस्मात् स्त्रीणां गणितविषयेऽपि रूचिरासीदिति ज्ञायते।

परन्तु एतन्न ज्ञायते यद् विभिन्नशास्त्रेषु निपुणाः एताः नार्यः क्षत्रियाः अथवा सम्पन्नपरिवारस्य कन्यका आसन्निति। क्षत्रियपरिवारे विवाहो बिलम्बेन भवति स्म। पठनार्थं शिक्षकस्य नियुक्त्यये सुरक्षितधनमासीत्।

साधारणपरिवारे नारीशिक्षा

साधारणतः समाजे सम्पन्नपरिवाराः अल्पसंख्यकाः भवन्ति। अधिकांशतः साधारणपरिवाराणां कन्यकाः धनाभावेन शिक्षायाः वञ्चिताः अभवन्। शिक्षकस्य नियुक्तिं कर्तुं तासां पितरः असमर्था आसन्। एतन्मतमष्टमशताब्दयां 'असहायः' नारदस्मृतेः टीकायां समर्थयति।[53] स अवदत् यत् शिक्षायाः अभावेन नारीणां बुद्धिः पुरुषाणामपेक्षया न्यूना जाता। अनया धर्माधर्मज्ञानस्याभावः भवति। अतः ताभ्यः स्वातन्त्र्यं न दद्यात्। अतः वक्तुं शक्यते यद् बह्वः नार्यस्तदानीं अशिक्षिताः आसन्।

कलात्मकशिक्षाव्यवस्था

साहित्यिकशिक्षामतिरिक्तं नृत्यगीतादिकलात्मकशिक्षाः ताभ्यः दीयते स्म। वैदिककालेऽपि तथा व्यवस्था आसीत्। सामवेदस्य लयबद्धोच्चारणं नार्यः अकुर्वन्।[54]

वात्स्यायनोऽपि कलायाः ज्ञानं नारीणां कृते आवश्यकमित्युक्तवान्।[55] तदतिरिक्तं चित्रकलां माल्यग्रन्थनम् उद्यानकलां क्रीडनकनिर्माणं गृहसज्जाः च स्त्रियः जानीयुरिति स उक्तवान्। संस्कृतनाटकस्य गायिका एषु गुणेषु कार्येषु वा निपुणा भवति।[56] मालविकायाः नाट्यपरीक्षायाः मध्यस्थता एका नारी विदर्भराजस्य माधवसेनस्य मन्त्रिणः भगिनी अकरोत्[57]। हर्षचरित्रे राज्यश्री नृत्यसंगीतेषु दक्षा दृश्यते।[58] विरहिणी स्त्री विशेषतः संगीतेन स्वमनोविनोदं करोति स्म।[59]। तदानीं स्त्रीपुरूषौ चित्रकलासु निपुणौ आस्ताम्। नाटकेषु कुत्रचित् स्त्रीषु विनोदार्थं चित्राङ्कनकर्मणि नियुक्ता दृश्यते।[60] रत्नावली-नाटके सागरिका चित्रफलकोपरि स्वप्रेमिकस्य चित्राङ्कनं कृत्वा सान्त्वनां लभते।[61] पुष्पचयने मालानिर्माणे पुष्पैः शय्यायाः रचनायां स्वस्यालंकारादिकर्मसु नार्यः निपुणाः आसन्। एभिः कर्मभिः स्त्रीणां मनोविनोदः अभूत्। पुनश्च परवर्तिकाले गुणरूपेणालङ्कृतानि कर्माण्येतानि।

परन्तु ज्ञायते यत् एते गुणाः सम्पन्नपरिवाराणां स्त्रीषु सीमिताः आसन्। गृहकर्मविषये तासां सम्यक् शिक्षा गृह एव अभूत्। स्मृतिग्रन्थेषु गृहकर्मणः दायित्वं तासामुपरि यथा दीयते, तस्मात् ताः गृहकर्त्रीत्वेन ज्ञायन्ते। सा वस्तु

स्वच्छमरक्षत। व्ययस्य तालिकामलिखत्।[62] सूत्रस्य कर्तनाय वस्त्रस्य निर्माणविषये च कन्यायै शिक्षा दीयते स्म।[63] परन्तु शिक्षादानस्योद्देश्यं धनोपार्जनं नासीत्। विषमपरिस्थितिषु विधवाः स्वस्यबालकानां च पोषणं वस्त्रनिर्माणेन अकुर्वन्।[64] स्मृतिकाराः स्त्रीणां कार्यक्षेत्रं गृहमिति स्वीकृतवन्तः। अतः तासां पाठ्यविषयः गृहविज्ञानं स्यादित्युक्तवन्तः। मेधातिथ्यनुसारं स्त्रीणां शास्त्रीयज्ञानस्य आवश्यकता नासीत्।[65] तस्य मतानुसारं स्त्री पत्या रक्षिता भवति। मनुस्मृतेः टीकाकारः नन्दनः स्त्रीणां कृते कस्यापि शिक्षायाः आवश्यकता नास्तीत्युक्तवान्।[66]

राजपरिवारेषु नारीशिक्षा

सम्भ्रान्तपरिवारीयाः कन्याः युद्धविद्याराजनीतिविषये च शिक्षामलभन्त। तदानीं राज्ञ्यः एवमासन् या युवराजानामभावे राज्यशासनं युद्धपरिचालनां च अकुर्वन्।[67] चालुक्यवंशस्य बह्व्यः राज्ञ्यः प्रान्तेषु मण्डलेषु च शासनव्यवस्थायां नियुक्ता आसन्[68]। अस्मात् राजपरिवारकन्यां बाल्यावस्थायां शास्त्रार्थस्य प्रौढवयसि राजनीतेश्च ज्ञानं दीयते स्म इति ज्ञायते। मरहठाराजपुतपरिवाराणां कन्याः खड्गं चालयितुं समर्था आसन्।[69]

एवं स्मृतिकाले नारीशिक्षा समाजेन परिस्थित्या प्रभाविता आसीत्। यत्र निर्धनपरिवारस्य कन्या शिक्षायाः वञ्चिता आसीत् , तत्र साधारणपरिवारस्य कन्या पितुः परिवारजनाद् वा सामान्यसाहित्यशिक्षां लब्धवती। गृहकर्मणः शिक्षां मातुः लब्धवती। किन्तु उच्चकुलसम्पन्नाः कन्याः धनबलेन शास्त्रीयविषयेषु युद्धादिविषयेषु च ज्ञानमलभन्त। नारीणामयं वर्गः तत्कालीनसमाजे नारीणां सम्मानमरक्षत। परन्तु सम्पन्नपरिवाराः अत्यल्पाः आसन्। अतः 500-900 शताब्द्यां नारीणां स्थितिः निम्नमुखी सञ्जाता। नारीवत् पुरुषाणामपि विवाहायुः स्वल्पं जातम्। येन ब्रह्मचर्याश्रमे शैथिल्यमागतम्। ई० पू० तृतीयशताब्द्यामेवं दृश्यते यद विद्यार्थी नवोढां पत्नीं गृहे विहाय पठनार्थं गुरुकुलमगच्छत्।[70] अल्तेकरमतानुसारं द्वादशशताब्दयां नार्यः त्रिंशत्प्रतिशतं शिक्षिताः आसन्।[71]

शिक्षायाः प्रकाराः

मानवसमाजस्य प्रगतेः कारणं शिक्षा भवति। समयानुसारं शिक्षायाः स्वरूपं निर्धारितं भवति, तत्रापि स्त्रीपुरुषयोः शिक्षायाः क्षेत्रं भिन्नं जायते। आर्यसमाजे उपनयनमनिवार्यमासीत्, तदनन्तरं तेभ्यो

धार्मिकसाहित्यिक- शिक्षां दीयते। जीवने समस्यानां समाधानार्थं शिक्षा उपकरोतीति मन्यते स्म। अतः केवलं विषयज्ञानप्रदानं शिक्षायाः उद्देश्यं नासीत् , अपितु विषयेषु प्रावीण्यप्रदानमासीत्। अत्र शिक्षाप्रणाल्याः पूर्वं शिक्षायाः उद्देश्यविषये आलोचना क्रियते।

प्राचीनकाले शिक्षा मानवस्य शारीरिक-मानसिक-बौद्धिकात्मिकशक्तीनां सन्तुलितरूपेण विकासं कृत्वा तस्य अन्तर्ज्योतिःशक्तिं जागृतमकरोत्। अतः सामाजिकावश्यकतासु शिक्षा सर्वाधिकं महत्वमलभत।

शिक्षायाः प्रमुखमुद्देश्यं, विद्यार्थिनः मनसि ईश्वरभक्तेः धार्मिकभावनायाश्चाङ्कनमासीत्। गुरवः पुरोहिताः आसन्। अतः युवकानां मनसि धर्मभावनायाः उद्रेककरणं तेषां पक्षे स्वाभाविकमासीत्। लोभविषये विजयमाध्यात्मिकशिक्षायाः लक्ष्यमासीत्। परन्तु संसारस्य त्यागं न कृत्वा यथा स समाजस्य धर्मनिष्ठसदस्यः भविष्यति तादृशो यत्नो दीयते स्म।

शिक्षायाः द्वितीयमुद्देश्यं, विद्यार्थिनः नैतिकविकासेन तस्य चरित्रनिर्माणम्। तदानीं वैदिकाध्ययनोपरि अधिकं बलं दीयते स्म। अतः चरित्रस्योत्कृष्टताविषये मनु उक्तवान् यत् यदि कोऽपि ब्राह्मणः केवलं गायत्रीमन्त्रं

जानाति, तस्योच्चारणं शास्त्रानुकूलं करोति, तर्हि स प्रशंसार्हो भवति। किन्तु शास्त्रविरोधी ब्राह्मणः त्रयाणां वेदानां ज्ञाता भवति, तथापि स माननीयः न भवति। अतः शिक्षायाः उद्देश्यं व्यक्तौ पाण्डित्यज्ञानेन साकं सदा चारित्र्यशीलस्य विकासकरणम्।[72]

विद्यार्थिनः व्यक्तित्वस्य विकासः शिक्षायाः तृतीयमुद्देश्यम्। तस्य मनसि एवं भावना दीयते स्म यत् स राष्ट्रस्य भविष्यनागरिको भवति। अतः राष्ट्रस्य संस्कृतिरक्षा, तस्याः मार्गदर्शनं तस्य दायित्वमासीत्। विद्यार्थिनः सम्यक् कर्तव्यपालनेन राष्ट्रस्योन्नतिः सम्भवा भवति। अतः अथर्ववेदे[73] उक्तमस्ति यत् समुचितशिक्षया योद्धा युद्धभूमौ कौशलं प्रदर्शयति तथा राजा शासनकार्ये सफलो भवति। सम्यग्रूपेण शिक्षितः स्नातकः राज्ञः सम्माननीयः अमन्यत। अतः विद्यार्थिनः मनसि आत्मनिर्भरतायाः भावना स्वाभाविकरूपेण आगच्छत्।

विद्यार्थिनः मनसि नागरिकतायाः सामाजिककर्तव्यस्य च भावनायाः विकासः शिक्षायाः चतुर्थमुद्देश्यमासीत्। भविष्यकाले सन्तानोत्पत्तिद्वारा प्रशिक्षणेन स संस्कृतेः रक्षां करिष्यतीति विश्वास आसीत्। पुत्र–पितृ–पतिरूपेण यथा

स दायित्वनिर्वाहं करिष्यति, तथा शिक्षा दीयते स्म। स्वोपार्जनेन परिवारस्य रक्षा, अतिथेः सेवा, नारीणामाश्रमव्यवस्था च करिष्यतीति आशा आसीत्। समावर्तनोत्सवावसरे प्रदीयमानः उपदेशः कर्तव्यानि दायित्वानि कथं सम्पादनीयानि, तस्या उपरि आधारित आसीत्।[74]

शिक्षायाः पञ्चमोद्देश्यं विद्यार्थिने सामाजिकयोग्यताप्रदानं तथा तस्य सुखस्य वर्द्धनम्। अस्योद्देशस्य पूर्त्तये शास्त्राणां व्यवसायानाम्, उद्योगानाञ्च व्यवस्था आसीत्। विद्यार्थिनः शारीरिकमानसिकबौद्धिक शक्तेः विकासेन साकं तस्मै पूर्वनिश्चितव्यवसायस्य (कौलिकव्यवसायस्य) ज्ञानप्रदानं तत्कालीनशिक्षायाः उद्देश्यमासीत्। यतोहि पैत्रिकव्यवसायस्य पालनं हितकरं भवतीति मन्यते स्म। एवं शास्त्राणां कलानां व्यवसायानामुन्नत्या सुखस्य पर्याप्तवृद्धिः स्वाभाविकी आसीत्।

शिक्षायाः महत्वपूर्ण तथा अन्तिमोद्देश्यमासीत् राष्ट्रियपरम्परायाः संरक्षणं संस्कृतेश्च संरक्षणम्।[75] शिक्षा हि केवलं साधनं भवति। अतः प्रत्येक कार्यस्य पक्षे

एतदनिवार्यमासीत् यत् स साहित्यकोषस्य एकस्यापि अंशस्य स्मरणं करिष्यति। एवं विभिन्नव्यवसायानां व्यक्तिः पुत्राय कौलिकव्यवसायविषये शिक्षामददात्। अनेन साहित्यग्रन्थानां व्यवसायानाञ्च संरक्षणमभूत्। अतः प्रत्यहं स्वाध्यायकाले पूर्वपठितविषयाणां पुनरावृत्तेः अपेक्षा आसीत्। अस्माकं प्राचीनशिक्षाप्रणाली बहुकालं यावत् सांस्कृतिकपरम्परायाः संरक्षणं संवर्धनं चाकरोत्।

अतएव वक्तुं शक्यते यत् शिक्षाशास्त्रिणः प्रत्येकवर्गस्य आवश्यकतां सांस्कृतिकपरम्परां च समीक्ष्य तदनुसारं सर्वेषां कृते शिक्षाव्यवस्थाः अकुर्वन्। विद्यार्थिनः स्मरणशक्तेः यथा सुरक्षाविकासश्च भविष्यति, तथा व्यवस्था शिक्षाप्रणाल्याः आसीत्। येन अध्ययनकाले अधीतस्य विषयस्य स्मरणं बहुकालं यावत् कृत्वा स परवर्तिकाले तस्योपयोगं करिष्यति। अतः व्यावसायिकशिक्षायां प्रायोगिकशिक्षायाः महत्त्वमासीत्।

प्रत्येकमार्यव्यक्तिः केनापि प्रकारेण धार्मिकसाहि- त्यिकशिक्षामवश्यमलभत। परन्तु कालान्तरे स्थितिः तथा नातिष्ठत्। ख्रिष्टीयप्रथमशताब्द्यामाश्रमव्यवस्थायाः पालने शिथिलता आगच्छत्। फलतः क्षत्रियवैश्यपरिवारेषु उपनयनं नाभवत्। अनेन तेषां साहित्यिकशिक्षा

आघातप्राप्ता अभूत्। परन्तु व्यावसायिकशिक्षाप्राप्तौ कष्टं नासीत्। क्रमशः जातिप्रथा रूढ़ा अभवत्। प्रत्येकं परिवारः स्वव्यवसायसम्बन्धे शिक्षादानमुचितमचिन्तयत्। अत एव समाजे निश्चितव्यवसायशिक्षणस्यावश्यकतानुसारं शिक्षणप्रणाल्याम् अनिवार्ययोजनायाः कार्यान्वयनमभवत्।

शिक्षा यथा सर्वेषां कृते सुलभा भविष्यति, तदर्थं ब्राह्मणानामेकमात्रं कार्यमध्यापनमभवत्। विद्यार्थिनः धनप्राप्तिः शिक्षकस्योद्देश्यं नातिष्ठत्। पुनश्च केवलं स्वस्य भरणार्थं शिक्षाग्रहीतुं विद्यार्थिनः अधिकारः अभवत्। तत्समये शिक्षणसंस्थाभ्यः यथाशक्तिः धनप्रदानं राज्ञः प्रजानां च कर्तव्यं निर्धारितमासीत्। एवं विद्यार्थिशिक्षकयोर्मध्ये धनसम्बन्धिसमस्यायाः समाधानमभवत्, येन निर्धनः विद्यार्थी उच्चशिक्षामलभत।

प्रत्येकमार्यः विद्यार्थिजीवने यथानियमेन ब्रह्मचर्यव्रतस्य पालनं करिष्यति, तथा व्यवस्था आसीत्। विषयेषु प्रावीण्यप्राप्त्यर्थं सुदीर्घसमयस्य निर्विघ्नाध्ययनस्य आवश्यकता आसीत्। अतः मध्ये विवाहं कर्तुं स्वतन्त्रो नासीत्। धर्मप्रणेतॄणां मतानुसारं त्वरा अहंमन्यता च विद्यायाः समरूपेण शत्रू भवतः। य आलस्यपरायणः

सुखार्थी चञ्चलवृत्तियुक्तश्च भवति तस्य विद्याप्राप्तिः न भवति।[76] अतः बौद्धिकनैतिकदृष्ट्या अयोग्यव्यक्तेः शिक्षा मास्तु, इति विचिन्त्य मनुरवदत् यत् मूढबुद्धियुक्तेन पठ्यते चेदकारणं कालाक्षेपो भवति।[77] परन्तु कन्यानां विवाहायुः यदा न्यूनीकृतः तदा ब्रह्मचर्याश्रमे शिथिलता आगच्छत्। ख्रिष्ट्रीयप्रथमशताब्द्यां अध्ययनाय आगमनात्पूर्व पञ्चविंशति प्रतिशतं छात्राणां विवाहः अभूत्।

बाल्यावस्थायां बालकस्य कोमलमनसि साध्वसाधुव्य-वहारस्य प्रभावः सम्यक्तया शीघ्रं पतति। तथा संस्कृतेः उत्कृष्टाचरणस्य वा प्रभावं पातयितुं कष्टं न भवति। तदानीं तस्य स्मरणशक्तिः प्रखरा ग्रहणशीला च भवति। अतः शिक्षारम्भस्य समयः बाल्यकाल एवासीत्।[78] उपनयन संस्कारानुसारं स सप्तवर्षीयः अष्टवर्षीयो वा भवति स्म। यथा विद्यार्थी स्मातको भूत्वा गृहस्थाश्रमे स्वाध्यायस्याविच्छिन्नतां रक्षिष्यति, तथा अपेक्षा आसीत्। याज्ञवलक्यानुसारं वर्षाकाले स्वाध्यायमधिकसमयं यावत् स्यात्।[79] आपस्तम्बानुसारं यदि पूर्वाधीतो विषयो पूर्णतया विस्मृतः तर्हि कतिपयकालं गुरुगृहे स्थित्वा तस्य अभ्यास करणीय आसीत्।[80] अतः समावर्तनोत्सवावसरे

स्वाध्यायात्प्रमादं न कर्तुमाचार्य उपदिष्टवान्।[81] तदानीं मुद्रणस्य व्यवस्था नासीत्। पुनरावृत्तिः अत्यावश्यकी आसीत्। अतः ज्ञानप्राप्त्यर्थमुन्नतये च उत्कृष्टेच्छायाः आवश्यकताऽसीत्।[82]

स्वस्य विषयानुसारं विद्यार्थिनः अभ्यासं कृतवन्तः साहित्यस्य विद्यार्थी निरन्तरकाव्यरचनायाः, कर्मकाण्डस्य विद्यार्थी यागसम्पादनस्य, लक्षणचित्रकलयोः विद्यार्थिनः क्रमशः मूर्त्तिनिर्माणस्य चित्राङ्कनस्याभ्यासमकुन्। तदतिरिक्तं प्रारम्भिकमाध्यमिकविद्यालयानां विद्यार्थिनः नूतनग्रन्थानां पुनरावृत्तिं कृत्वा अभ्यासं कृतवन्तः।

सम्पर्कितजनस्य व्यवहारस्य प्रभावः मनसि पतति। अतः उत्तमचरित्रस्य निर्माणार्थं बुद्धेः विकासार्थं पण्डितजनस्य सान्निध्यं सर्वोत्कृष्टमासीत्।[83] एवं सान्निध्यं गुरुकुले सुलभमासीत्। अतः विद्यार्थिनां पठनार्थं गुरुकुले प्रेषयितुं शिक्षाशास्त्रिणः उक्तवन्तः। येन स गुरोः प्रत्यक्षनियन्त्रणेन स्थास्यति।[84] प्राचीनकाले एकस्यां कक्षायां पञ्चदश विंशतिर्वा छात्राः अपठन्। अतः तेषां प्रगतये यत्नं कर्तुमवसर अलभत। प्राचीनभारतीय-शिक्षाप्रणालेः एतद् वैशिष्ट्यमासीत्।[85]

एवं विद्यार्थिकुलं प्रति शिक्षाशास्त्रिणां भावना आसीत्। तेषां विश्वास आसीत् यत् गर्भावस्थायां संस्कारस्य प्रभावः शिशोः उपरि पतति। तदनुसारं तस्य चरित्रनिर्माणं भवति। प्रह्लादस्य अभिमन्योः वा उपरि भक्तेः वीरतायाः वा प्रभावः गर्भावस्थायामपतत्। अतः गर्भधारणवेलायां महापुरुषाणां मनिषिणां वा जीवनचरितं पठितुमुपदिश्यते स्म।

शिक्षाव्यवस्थायां नारीणां योगदानम्

भारतीयशिक्षाव्यवस्थायां संस्कृतेः संरक्षणायाधिकं महत्त्वं दीयते स्म। अतः गर्भधारणसमये उत्तमचरित्राणां पाठनाय धर्माचरणं च कर्तुं नार्यः उपदिष्टाः आसन्। येन शिशोः मनसि उत्तमप्रभावः पतिष्यति। अतः संस्कृतेः संरक्षणार्थं गुरुकुलं सहायताप्रदानं प्रत्येकं परिवारस्य धर्म आसीत्। कथामाध्यमेन बालकस्य कल्पनाशक्तेः विकासाय चेष्टा अभूत्। ऋग्वेदे (५-४७-६) मन्त्रे उक्तं यत् माता स्वपुत्राय बुद्धिं वस्त्रं निर्मातीति। अस्माद् बालकस्य बुद्धिवर्धनार्थं मातुरवदानं ज्ञायते। ध्रुवस्य भक्तिमार्गस्य पथप्रदर्शनं तस्य माता अकरोत् (भाग, पु० -४-७)। सत्यं कथयितुं माता कथं प्रवर्तयति स्म,

तस्योदाहरणं छान्दोग्योपनिषदि सत्यकेतुः जबालेः ब्रह्मचर्याश्रमे प्रवेशप्रसङ्गे दृश्यते। गोत्रं न ज्ञात्वा माता उक्तवती- 'अहं न जानामि, तव गोत्रं किं भवति, जबाला मम नाम, तव नाम च सत्यकामो भवति। अतः स्वनाम सत्यकामजबाला इति कथय (''छा० उ० ६-४२)' अस्मात् ज्ञायते यत् यदि कोऽपि निम्नकुलसम्भवा स्त्री जबाला इव सत्यं कथयति, तर्हि सा सत्यकाम इव प्रतिभासम्पन्नं पुत्रं प्राप्नोति। ऋतुध्वजस्य पत्नी मदालसा अध्यात्ममार्गे दक्षतां प्राप्य चतुरः पुत्रानजनयत् ये ऋषयः अभवन्। पुनश्च राज्यस्य आवश्यकतानुसारं पञ्चमं पुत्रं जनितवती, यः शूरवीरः भूत्वा राजा अभवत्। शिवाजीवीरस्य बालमनसि तस्य माता वीरत्वस्य भावनां आनयत्। गुरोः रामदासस्य चरित्रनिर्माणे तस्य परिवारस्य प्रभावं आसीत्। अतः प्रारम्भिकशिक्षा गृहादेव प्राप्यते। प्रायः सुसंस्कृतपरिवारेषु संज्ञा-व्याकरणस्य कतिपय सूत्राणि वा बालान् पाठयन्ति। अनेन अध्यापनकार्ये गुरवः सहायतां कृतवन्तः। बालिकायाः शिक्षणस्य व्यवस्था गृह एव अभवत्। ताः गृहविज्ञानसम्बन्धिज्ञानं मातुः; साहित्यविषयकं ज्ञानं पितुः, पितृव्याद् वा अलभन्त। स्मृतिषु बालकस्य अक्षरज्ञानादिविषये उल्लेखो न प्राप्यते।

वस्तुतः प्रत्येकं स्नातकः गृहस्थाश्रमे पूर्वाधीतविषयान् स्वाध्यायं कृत्वा अवश्यं स्मरिष्यतीति अपेक्षा आसीत्। अतः स उपनयनात् पूर्वं बालकं स्वव्यवसायविषये साहित्यादिविषये च सामान्यं ज्ञानमददात्। अस्मिन्नवसरे स्त्रियः ज्ञानं प्राप्य बालकाय ज्ञानप्रदाने सहायतामकुर्वन्।

शिक्षणसंस्थाः

आधुनिकयुगे यथा गुरुत्वं विद्यालयाः महाविद्यालयाः प्राप्नुवन्ति, तथा प्रचीनकाले गुरुकुलाः अलभन्त। अपरिपक्वं बालकं शिक्षकः प्रत्यक्षनियन्त्रणेन योग्यनागरिकत्वेन प्रतिष्ठापितवान्। प्रागैतिहासिककाले (ई० पू० १०००) साहित्यिकव्यावसायिकादिसकलशिक्षाः गृह एव अलभत। किन्तु कालान्तरे साहित्यक्षेत्रस्य वृद्धिहेतोः जनाः विभिन्नविषये रूचिं प्रदर्शितवन्तः। अतः विषयमाधारीकृत्य विद्यालंयानां स्थापना अभूत्। एते विद्यालयाः गुरुकुलरूपेण प्रसिद्धा अभवन्। ख्रिष्टीयप्रथमशताब्द्यां एते गुरूकुलाः शिक्षायाः प्रधानकेन्द्ररूपेण प्रसिद्धा अभवन्।

यद्यपि तदानीं बौद्धविहारेषु विद्यालयानां मन्दिरेषु महाविद्यालयानां स्थापना अभूत्, तथापि महत्वं जनैः

स्थापिता: गुरुकुला: अलभन्त। तक्षशिला काशी च शिक्षाया: प्रधानकेन्द्रे आस्ताम्। परन्तु तत्रापि सर्वसाधारणाय शिक्षाव्यवस्था नासीत्। जना: स्वविषयानुसारं विभिन्नसंस्थानां स्थापना अकुर्वन्। ते स्वतन्त्ररूपेणाध्यापनकार्यमकुर्वन्। सुदूराद् विद्यार्थी गुरो: कीर्त्तिं श्रुत्वा पठनार्थमागच्छत्। एवं प्रचीनकाले गुरुकुलानि प्रसिद्धिमलभन्त। स्मृतिग्रन्थेषु एवं गुरुकुलानां प्रशंसा दृश्यते।

गुरुकुलम्

गुरुकुलप्रणाली प्रचीनभारतीयशिक्षापद्धते: प्रमुख-विशेषता आसीत्। स्मृतिषु वर्णित: उपनयनसंस्कार: गुरुकुले प्रवेशार्थमनुमतिपत्रमासीत्। उपनयनसंस्कारेण बालक: द्विजन्मा अकथ्यत। तस्य प्रथमजन्म मातु: द्वितीयं च गुरो: ज्ञानप्रदानेन अभवत्।[86] अत: उपवीत-धारणमवश्यं शिक्षाप्राप्त्यर्थं गमनस्य सूचकमासीत्।[87] मनु: आचार्यं शिष्यस्य मानसपितरमन्यत। अत: यज्ञोपवीतधारणेन शिष्य: द्विजन्मा अकथ्यत।[88] स्मृतिषु वर्णितमस्ति यत् उपनयनादनन्तरं शिष्य: उपाध्यायस्य प्रत्यक्षनियन्त्रणेन स्थास्यतीति।[89] विद्यार्थी अन्तेवासीति

उच्यते स्म। यस्यार्थो भवति गुरोः सामीप्ये अवस्थापनम्। मनोःमतानुसारं विद्यार्थी गुरोः सेवां कुर्यात्। तत् पश्चात् शयनं, पूर्वमुत्थनञ्च कुर्यात्।[90] भिक्षया लब्धं भोजनं गुरोः समीपे स्थापयित्वा तत्पश्चाद् गृहणीयात्।[91] अग्निहोत्रे आचार्यस्य सहायतां कुर्यात्।[92] शिष्यस्य एवं कार्यानुशीलनेन ज्ञायते यत् स गुरुकुले एवावश्यं वासमकरोत्। येन एषु कर्मसु गुरोः सहायतां कर्तुं समर्थः अभवत्। एवमध्ययनावसाने समावर्तनोत्सवस्य अर्थो भवति यद् गुरो आश्रमाद् गृहं प्रत्यावर्त्तनम्।

गुरुकुलस्य महत्त्वम्

तदानीं गुरुकुलप्रणाल्याः महत्वमासीत्। ब्रह्मचारी प्रारम्भिककाले स्वल्पवयसि अपरिपक्वबुद्धियुक्त भवति। अतः बाल्यकाले गुरो समीपे अवस्थानेन तस्य प्रभावेण बालकस्य उत्तमचरित्रस्य स्थापना भवति। तस्मिन् काले आचार्याः प्रायशः गृहस्थाः आसन्। तेषां सन्निधानेन बालकाः गृहस्थाश्रमविषये सम्यग्ज्ञानमलभन्त। गुरुकुलप्रथायाः प्रभावेण धनिकपरिवारस्य पथभ्रष्टबालकस्य संशोधनमजायत। तथा विद्यार्थी दक्षः आत्मनिर्भरशीलः व्यवहारकुशलश्चाभवत्।[93] महाभारतेऽपि

उल्लेखोऽस्ति तद् गुरुकुलवासं विना तथा एकाग्रता दक्षता च नागच्छतः, यथा तत्र निवासनेन भवति।[94] अत एव गुरुकुलप्रणाली विशेषमहत्त्वमलभत।

गुरुकुलस्य स्थानम्

गुरूकुलस्य स्थापना वने उपवने नगरे ग्रामे वा अभवत्। नगरेषु गुरुकुलानि अत्यल्पानि आसन्। अधिकांशदार्शनिकाचार्याः निर्जनवने वसितुमध्येतुं चिन्तनाय च ऐच्छन्। वाल्मीकेः सान्दीपनेः कण्वस्य च आश्रमाः वनेषु आसन्। यत्र दर्शनेन साकं व्याकरणज्योतिषनागरिकशास्त्रादीनां शिक्षा अदीयत।[95] अधिकांशगुरुकुलानि ग्रामस्य नगरस्य वा समीपे आसन्।[96] तेषां वातावरणं स्वतन्त्रमासीत्। अनेन वासेन गृहस्थाः आचार्याः सामग्रीं संचेतुं छात्राश्च भिक्षाटनाय अधिकं कष्टं नैव भजेयुः। मनोः मतानुसारं ब्रह्मचारी गुरोः कुलात् स्वजातिजनेभ्यः कुलबान्धवाच्च भिक्षायाचनां न कुर्यात्। यदि भिक्षाग्रहणयोग्यगृहं न लभ्यते, तर्हि पूर्वोक्तानि गृहाणि त्यक्त्वा भिक्षाग्रहणं कुर्यात्।[97] अस्मादपि स्पष्टं भवति यत् गुरुकुलानि ग्रामस्य समीपे आसन्। स्वजातेः भिक्षाग्रहणं पक्षपातपूर्णं भवेत्। पुनश्च ब्रह्मचारी गृहं प्रति आकर्षितो

भवेत्। अतः स्वजातेः भिक्षाग्रहणं पूर्णतः नाङ्गीकृतमासीत्। बहवः पण्डिताः राज्ञा सामन्तैः वा प्रोत्साहिताः सन्तः नगरे वासमकुर्वन्। येन तन्नगरं शिक्षायाः केन्द्रमभवत्। तक्षशिला–पाटलिपुत्र–कान्यकुब्जमिथिलाधारातंजोरप्रभृतयः तेषु प्रसिद्धा आसन्। एवं तीर्थस्थानं प्रति च पण्डिता आकृष्टा अभवन्। फलतः काशीकर्णाटकनासिकादयः शिक्षायाः केन्द्रमभवत्।

कदाचित् पण्डितान् आमन्त्र्य भूमिदानं वा कृत्वा जीविकायाः व्यवस्थां चाकुर्वन्। येन तत्र नूतनग्रामस्य वसतेः वा रचना अभवत्। एवं ग्रामः अग्रहारः उच्यते हिन्दूसम्प्रदायानां मठाधीशानां च प्रभावेण खिृष्टीयद्वितीयशताब्दौ मठाःशिक्षायाः महत्वपूर्णकेन्द्राण्य–भवन्। एषु शंकराचार्यरामानुजाचार्यमध्वाचार्यमठाः प्रसिद्धाः भवन्ति।

सार्वजनिकशिक्षाव्यवस्था प्रथमतः बौद्धविहारेषु अभवत्। बुद्धदेवः उपासकानां शिक्षादीक्षोपरि गुरुत्वमददात्। आर्यसंस्थासु धार्मिकग्रन्थानामध्यापनामा–ध्यात्मिकाभ्यासश्चाभवताम्। सम्राडशोकः (३०० ई० पू०) बौद्धविहाराणामुन्नतिमकरोत्। कतिवर्षेभ्यः परमेते

शिक्षायाः महान्ति केन्द्राणि सति गुरुकुलानि इव अभवन्। किन्तु अत्र गुरुः कस्याप्येकस्य कुलस्य न भूत्वा समग्रस्य बिहारस्य मुख्य आसीत्। धर्मस्य प्रचाराय एते जनसाधारणनिमित्तं कार्यं कृतवन्तः। तासु संस्थासु नालन्दाविश्वविद्यालयः (४५० ई०) बल्लभी (७०० ई०) विक्रमशीला (८०० ई०) इत्यादयः प्रमुखाः आसन्। एतासां संस्थानां विकासं दृष्ट्वा हिन्दवः मन्दिरेषु शिक्षासंस्थानां स्थापनां कृतवन्तः।

नारीणां कृते शिक्षणसंस्थाः

नारीणां कृते स्वतन्त्रशिक्षासंस्थानां व्यवस्था आसीदिति कुत्राप्युल्लेखो न दृश्यते। बौद्धा बिहारेषु तासां शिक्षाव्यवस्थां कृतवन्तः। परन्तु कालान्तरे तदपि नातिष्ठत्। याः कन्यकाः गुरुकुले अध्येतुमवसरं प्राप्तवत्यः, ताः छात्रैः साकमध्ययनं कृतवत्यः। उत्तररामचरितानुसारं आत्रेयी वाल्मीकेः आश्रमे अधीतवती। भवभूतेः मालतीमाधवनाटके कामन्दकी गुरुकुले अधीतवती। परन्तु एतादृशानि उदाहरणानि नाधिकानि। प्रायशः गुरोः पत्नीकन्यावधू च गुरूकुले वासहेतोः तत्र पठनस्यावसरं प्राप्तवत्यः। परन्तु शास्त्रानुसारं गृहेष्वेव कन्याः शिक्षामलभन्त।

छात्रावासस्य व्यवस्था

प्राचीनभारतवर्षे गुरोः आश्रमे तस्य प्रत्यक्षनियन्त्रणेन विद्याग्रहणं समीचीनमासीत्। अतः अधिकाधिकछात्राः गुरुकुले न्यवसन्। गुरवः छात्राणामावासनिवासस्य व्यवस्थां कृतवन्तः। भोजनस्य व्यवस्था भिक्षाटनेन अथवा अध्यापकस्य गृहे अभवत्।[98] तदानीमेकस्य गुरोः समीपे पञ्चदशभ्यः अधिकछात्राः नैव अपठन्।[99] कदाचित् केवलं चत्वारः विद्यार्थिनः अधीतवन्तः।[100] अतः तेषां भोजनव्यवस्था गुरोः पक्षे काठिन्यं नासीत्। यस्मिन् क्षेत्रे गुरवः व्यवस्थां कर्तुमसमर्था अभवन्, तत्र छात्रः स्वव्यवस्थां कृतवन्तः।[101]

अध्यापनकार्यसम्पादनार्थं छात्रेभ्यः धनयाचनं निन्दनीयकर्म आसीत्। गुरुः निरतिशयं धनहीनछात्रं पठनाद् वारयितुमसमर्थ आसीत्। य एवमकरोत् स विद्यायाः व्यवसायीति निन्दितोऽभवत्।[102] एतावदध्यापकाः धार्मिककार्येषु ऋत्विग् भवितुमसमर्था आसन्।[103] गुरोः अधिगतेन एकेन अक्षरेण छात्रः तस्य ऋणी अभवत्।[104] अतः समावर्तनोत्सवे शिष्यः गुरवे यथाशक्त्यनुसारं धनमददात्। निर्धनाः छात्राः गुरोः गृहकर्मणि सहयतां कृत्वा

भिक्षाटनेन च समावर्तनावसरे गुरवे धनं दत्त्वा अनृणोऽभवन्। वस्तुतः शिक्षासंस्थाभ्यः मुक्तहस्तेन धनप्रदानं राज्ञः प्रजानाञ्च कर्तव्यमासीत्।

सहशिक्षाव्यवस्था

प्रागैतिहासिककाले साहित्यव्यवसायादिसकलशिक्षायाः व्यवस्था गृह एव अभवत्। अस्मिन्नवसरे सम्भवतः गृहस्थाः भ्रातरः भगिन्यश्च मिलित्वा अग्रजेभ्यः शिक्षाग्रहणमकुर्वन्। किन्तु क्रमशः विद्यायाः भण्डारस्य वृद्धिहेतोः जनाः विशेषविषये प्रवीणता प्राप्तुमैच्छन्। अतः गृहं त्यक्त्वा विद्यार्थिनः दूरे निवसन्तः प्रतिष्ठितेभ्यः अध्यापकेभ्यः वाञ्छितविषयान् अपठन्। कन्याः अपि उच्चशिक्षायै गृहाद्दूरं गतवत्यः।

उत्तररामचरिते वाल्मीकेः आश्रमे लवकुशाभ्यां सह आत्रेयी अपठदिति उल्लेखोऽस्ति।[105] एतत् सहशिक्षायाः प्रमाणं ददाति। एवं मालतीमाधवनाटके भवभूतिः भूरिवसुना देवराजेन च सह कामन्दकी नाम्नी स्त्री शिक्षां लब्धवतीति वर्णयति।[106] भवभूतिरष्टमशताब्देः कविरासीत्। अस्मात् ज्ञायते यत् भवभूतेः समये अथवा तत्पूर्वं सहशिक्षायाः प्रचलनमासीत्। एवं पुराणेषु

कहोदसुजातयोः, रुहुप्रमदवरयोः कथा वर्णिता अस्ति अस्मात् ज्ञायते यत् कन्याः बालकैः सह विद्याध्ययनमकुर्वन्। युवत्यः भूत्वा विवाहं कृतवत्यः। अतः कदाचित् गान्धर्वविवाहमकुर्वन्। एतदपि स्पष्टं भवति यत् नार्यः विना आवरणं धारयन्ती पुरुषैः साकं विद्याभ्यासमकुर्वन्। अतः सहशिक्षा आसीदिति ज्ञायते। गुरुकुले सहशिक्षायाः प्रचलनमासीदिति आश्वलायनगृह्यसूत्रस्य समावर्तनसंस्कारस्य विधिवर्णनप्रसङ्गात् ज्ञायते। विधौ अस्मिन् स्नातकस्य अनुलेपनक्रियायाः वर्णनप्रसङ्गे बालकस्य बालिकायाश्च समावर्तनसंस्कारः समकाले सम्पन्नः दृश्यते।[107] तदानीं नारीणां ब्रह्मचर्याश्रमवेदाध्ययनसमावर्तनसंस्काराणामौचित्यम् आश्वलायनमतानुसारं प्रमाणितं भवति।

पूर्वकाले यदा नार्यः बहुसंख्यकाः अध्ययनरता सत्यः स्वकृतिभिः साहित्यस्य समृद्धिमानयन्। तदानीं नूनं तासु काचित् अध्यापनकर्मणि नियुक्ताः स्युः। संस्कृतसाहित्ये उपाध्याया, उपाध्यायिनीशब्दयोः प्रचलनं दृश्यते। उपाध्यायस्य पत्न्याः कृते सादरमुपाध्यायिनीति पदस्य प्रचलनमासीत्। यत्र अध्यापनकार्ये नियुक्तानां विदुषीणां

निमित्तमुपाध्याया इति पदं रूढमासीत्।[108] अध्यापिकानां कृते स्वतन्त्रशब्दस्य प्रचलनस्य आवश्यकता तदा स्यात्, यदा तासां संख्या अधिका अभूत्। द्वादशशताब्देरनन्तरं भारतवर्षे अवगुण्ठनप्रथायाः प्रचलनमभूत्। तत्पूर्वं शिक्षणार्थं कठिना बाधा नासीत्। ताः केवलं कन्याः अथवा (उभौ बालिकाबालकौ) सर्वान् अध्यापितवत्यः सम्यक् न ज्ञायते। पाणिनिः आचार्य चार्यानीशब्दयोः प्रयोगं कृतवान्। स कन्यानां कृते स्वतन्त्रछात्रावासस्य उल्लेखमकरोत्।[109] अस्मात् ताः छात्रावासानां दायित्वेऽपि आसन्निति सम्भावना क्रियते। रामदास गौडः अलिखत्–[110] हर्षात् परं सप्तमाष्टमशताब्द्योः स्त्रियः अध्यापितवत्य इति प्रमाणं लभ्यते। शंकराचार्येण पराजितः मण्डनमिश्रः संन्यासं नीतवान्। तदनन्तरं तस्य पत्नी श्रृङ्गगिरौ अध्यापनकर्मणि नियुक्ता अभूत्। कथ्यते यत् तया भारत्या प्रशिक्षिताः सन्तः द्वारकायां श्रृङ्गेरीमठस्य च शिष्यसम्प्रदायाः "भारती" इति नाम्ना प्रसिद्धाः जाताः। परन्तु स्थानाभावहेतोः अन्यकारणवशाच्च कन्याः गृहे पठेयुः। उच्चशिक्षायाः अभिलाषां न कुर्युः। अतः छात्राशालाविषये उपाध्यायानां च सम्बन्धे अधिकं तथ्यं न लभ्यते। यद्यपि तदानीं मैत्रेयी-गार्गी-विश्ववाराः इव

उच्चशिक्षिताः नार्य आसन् तथापि तद् वक्तुं न शक्यते यत् तदानीं स्त्रीशिक्षायाः अधिकप्रचलनमासीत्। अथवा स्त्रीशिक्षासंगठितरूपेण विद्यमाना आसीत्। अस्मिन् प्रसङ्गे एल्. मुखर्जी[111] उक्तवान् एतत् सम्भाव्यते यद् तदानीं स्त्रीणां कृते शिक्षायाः काऽपि संगठितव्यवस्था नासीत्।

यस्मिन् क्षेत्रे उपाध्यायानां सौविध्यमलभ्यत, तत्र शिक्षणार्थं कन्याः गच्छेयुः। अन्यत्र तु अध्यापकेभ्यः ज्ञानप्राप्त्यर्थं गच्छेयुः। समाजे तदा गान्धर्वविवाहव्यवस्थायाः विरोधः नासीत्।[112] किन्तु परवर्तिकाले गान्धर्वविवाहस्य प्रचलनेन कन्यानां मानसिकस्थितेः पतनं भविष्यतीति आशंका अभूत्। अतः गृहस्थः गृहे शिक्षकान् नियुज्य कन्यानां शिक्षाव्यवस्थां अकुर्वन्। उच्चशिक्षायै दूरे तिष्ठतः उपाध्यायस्य पार्श्वे गच्छन्तीनां कन्यानां संख्या अधिका न स्यात्। यतो हि जातककथासु तासां नामोल्लेखो न दृश्यते। ख्रिष्टीयचतुर्थशतेके बालकानां सार्वजनिकशिक्षाव्यवस्था नासीत्। हारीतः गृहे एव पित्रा भ्रात्रा पितृव्येन वा कन्या शिक्षाप्राप्ता स्यादिति उक्तवान्।[113] एवं मनुरपि गृहाद् बहिः छात्रैः साकं कन्याः शिक्षिताः न स्युरिति मतमददात्।[114] यतः सहशिक्षया कन्यानां कौमार्यत्वस्य हानिर्भवतीति आशंका आसीत्।

स्त्रीशिक्षायाः संगठितव्यवस्थायाः प्रचलनं बौद्धकाले अभूत्। बुद्धदेवः संघेषु नारीणां प्रवेशस्यानुमतिमददात्। विहारेषु निवसन्तीनां भिक्षुणीनां शिक्षायाः सन्तोषजनकव्यवस्था आसीत् ब्रह्मवादिनीव तत्रस्थाः भिक्षुण्यः धर्मदर्शनशास्त्रविषयकं ज्ञानं प्राप्तुं ब्रह्मचर्यव्रताचरणमकुर्वन्। तासु कति सिंहलदेशं गत्वा तत्र बौद्धधर्मस्य अध्यापिकारूपेण प्रसिद्धिमलभन्त। विहारेषु सहशिक्षायाः प्रचलनमासीत्। किन्तु ख्रिष्टीयचतुर्थशतके बौद्धविहारेष्वपि स्त्रीशिक्षायाः ह्रासः पूर्णतया अभूत्। शिक्षणरतानां नारीणां संख्या अधिका नासीदिति वक्तुं शक्यते।[115]

शिक्षणविषयाः

प्राचीनभारतीयशिक्षायाः इतिहासः सहस्रवर्षपर्यन्तं विस्तृतो भवति। स्मृतिग्रन्थाः समकालीनशिक्षा-व्यवस्थाविषये तत्पूर्वं वेदकालीनशिक्षाव्यवस्थाविषये आलोकपातं कुर्वन्ति। तेषु वर्णितानुसारं तदानीं शिष्याः वेदब्राह्मणारण्यकोपनिषद्वेदांगसूत्रग्रन्थान् चाधीतवन्तः। ख्रि० पू० १५०० पर्यन्तं प्रायशः वेदमन्त्राणां सङ्कलनमभूत्। तदनन्तरं वेदानामर्थावबोधाय टीकाग्रन्थरूपेण ब्राह्मणग्रन्थाः

विरचिताः। तदानीं विदुषां प्रतिभा वेदानां संरक्षणाय तेषामर्थप्रकाशनाय च विनियुक्ता अभूत्, न तु नूतनसाहित्यरचनायाम्। फलतः वैदिकयज्ञसम्बन्धिनां सिद्धान्तानां मतवादानां रीतीनां च विवेचनं ब्राह्मणग्रन्थेषु अभवत्। यज्ञस्य कर्मकाण्डोपरि विद्वांसोऽ-धिकमालोचनामकुर्वन्। परिणामतः कर्मकाण्डो जटिलो दुरूहश्चाभवत्। अन्यस्मिन् पक्षे वेदानां दार्शनिकप्रवृत्तेः विकासोऽभवत्, या उपनिषद्रूपेण पूर्णतामभजत।

कालक्रमेण वेदातिरिक्तसाहित्यानामपि विकासोभूत्। अतःसर्वेषु शास्त्रेषु प्रवीणताप्राप्तिः एकस्य क्षमतायाः बहिः अभवत्। तदा मुद्रणकलायाः विकासः नाभवत्। अतः वैदिकसाहित्यस्य विलोपस्य भयमासीत्। केचन विद्वांसः वेदसंहितानां कण्ठस्थीकरणमकुर्वन्। येन स्वरूपमक्षुण्णं स्थास्यति। अपराः पण्डिताः टीका-निरूक्तशब्दकोशानामध्ययनं कृत्वा तेषां व्याख्याकरणे नियुक्ताः अभवन्। अस्मिन् काले हिन्दूमेधायाः सर्वाधिकोनिर्णयात्मकः रचनात्मको विकासश्चाभूत्। फलतः शिक्षादर्शनन्यायमहाकाव्यभाषा-विज्ञानव्याकरणज्योतिषनिरूक्तकल्पकलाविद्यादिक्षेत्रेषु महत्वपूर्णसफलतामलभ्यत। एषु विभिन्नेषु क्षेत्रेषु विद्वांसः

स्वच्छात्राणां सुखबोधाय ग्रन्थानां संग्रहं कृत्वा संक्षिप्तरूपेण व्याख्यां च कृतवन्तः। उपनिषत्सूत्रकालेषु (ई० पू० १०००) लेखनकलायाः ज्ञानमभवत्। परन्तु वैदिकविषयाणां लेखनमधार्मिककार्यत्वेन स्वीकृतमासीत्। अतः वैदिकचरणान् आधारीकृत्य विद्वांसो धर्मसूत्रनाम्ना नूतनसाहित्यस्य रचनां कृतवन्तः।

उपर्युक्तसंस्कृतवाङ्मयस्य परिवर्तनशीलमितिहासं दृष्ट्वा वयं तस्य विविधतायाः विशालतायाश्च ज्ञानं प्राप्नुमः। स्मृतिग्रन्थेषु वर्णितानां सामाजिकरीतीनां धार्मिककर्मकाण्डानां संस्काराणां सर्वेक्षणं भवति। वस्तुतः विशालं समाजं लक्ष्यीकृत्य स्मृतिग्रन्थाः निर्मिताः। एषामुपरि तत्कालीनसाहित्यस्य प्रभावः स्यात्। अतः गृह्यसूत्रेषु धर्मसूत्रेषु उपनिषत्सु मीमांसाग्रन्थेषु च वर्णितानां प्रथानां रीतीनां मान्यतानां संस्काराणां च सङ्कलनमेषु ग्रन्थेषु विद्यते। स्मृतिग्रन्थेषु सर्वाधिकसफलतां मनुस्मृतिः अलभत। अतः अत्र मनुस्मृतौ उल्लिखितानां विषयाणां सामान्यवर्णनं भवति।

मनुः वेदत्रयं श्रुतिरिति अकथयत्।[116] वेदत्रयं संस्कृतसाहित्यस्य सर्वप्रथमरचना भवति।[117] वैदिकमन्त्राणां

विकासः चरणेषु अभवत्, येषां शाखानां ज्ञानं पुरोहितवर्गाः प्राप्तवन्तः। वेदसाहित्येषु प्रावीण्यं प्राप्य ऋग्वेदी यजुर्वेदी वेदपारंगामी ऋत्विग् विद्वद्ब्राह्मणाः सम्मानं प्राप्तवन्तः।[118] यः त्रिषु वेदेषु प्रावीण्यमलभत , स त्रिवेदी उच्यते स्म।[119] मनुस्मृतौ अध्यापनाय वेदानां विशिष्टांशानामुल्लेखो भवति। तत्समये धार्मिकक्रियया प्रायश्चित्तेन शुद्धीकरणस्य प्रक्रिया प्रसिद्धा अभूत्। अतः विशिष्टावसरेषु निर्दिष्टवेदमन्त्राणा-मुच्चारणं महत्वमासीत्। अस्मिन्नवसरे मन्त्राणां नियमा-नुसारेणोच्चारणं स्यात्, येन फलप्राप्तिः भविष्यतीति तत्रोल्लेखमस्ति।[120] अथर्ववेदस्य अंगिरसश्रुतेः प्रयोगः शत्रोः विनाशायाभवत्।[121] स्नातकानां स्वाध्याये प्रत्यहं ब्राह्मणग्रन्थानामध्ययनाय प्रोत्साहनं दीयते।[122] मनुः ऐतरेयब्राह्मणस्य 'सुब्रह्मण्य' इति मन्त्रस्य (६-२) [123] (८.१३-६) तथा बहवृचब्राह्मणस्य 'शुनःशेप' गाथाया[123] उल्लेखमकरोत्।

वेदानामन्तिमचरणानां समाप्तेः अनन्तरमारण्यकग्रन्थानां पाठः।[124] उपनिषद्भिः आरण्यकग्रन्थानां समाप्तिरभवत्। मनुमतानुसारं वने निवसन्तः ब्राह्मणाः वेदवचनानामभ्यासं कुर्युः।[125] उपनिषदः वेदानां रहस्यग्रन्था इति कथिताः। मनुः वेदानां रहस्यं कल्पशाखयोः स्थितिज्ञानविषये[126]

वेदान्त[127]मीमांसा[128] न्यायशास्त्र[129]यौगिकपद्धतीनां वा सम्यग् ज्ञानस्य संकेतमददात्।

वैदिका:वेदाभ्याससमये वेदाङ्ग[130]निगमानां[131] सहायतामनीयत। मनुः षड्वेदाङ्गानामुल्लेखमकरोत् येषां कल्पनिरुक्तं इति विभागद्वयमासीत्[132] कल्पशास्त्रेषु श्रोतसूत्राणां समावेश: अभूत्। मनु गृह्यसूत्रेषु सम्पादितगृह्यकर्म[132] पाकयज्ञाना[133]मुल्लेखमकरोत्। केषुचित् स्थानेषु धर्मशास्त्राणामुल्लेखो लभ्यते।[134] वसिष्ठात्रिशौनकगौतमभृग्वादीनां तत्कालीनविदुषां मतमुद्धरणं कृतम् , तथा प्राचीनभारतीयेतिहासिकगाथानां प्रथानाञ्चोल्लेखमकरोत्।[135]

मनुः पौराणिककालस्य वेननहुषपिजवनसुदाससुमुखनैमिपृथुमनुकुबेरविश्वामित्रा[136]गस्त्य[137]वामदेव[138] भारद्वाजवृधु[139]वसिष्ठालक्षमालाशारङ्गीमन्दपाला[140]दीनां विषये अजानत। तत्समकालीनाः सर्वे टीकाकाराः वैखानसशास्त्रं स्वीकृतवन्तः[141]। धनवृद्ध्यर्थमर्थशास्त्र[142] स्य तच्छाखानां च वर्णनं[143] लभ्यते। तदानीं दण्डनीतिविद्याऽऽन्वीक्षिकीविद्याविषयेषु शिक्षाः दीयन्ते स्म[144]। ब्राह्मणाः पौरहित्यमध्यापनं च स्वतःशिक्षिताः। क्षात्रधर्मराजनीतिविषये शिक्षा क्षत्रियेभ्यः विशेषतया अदीयत[145]। द्रव्याणां

गुणदोषविषये वैश्येभ्यः शिक्षा दीयते स्म,[146]। डॉ० वासुदेवशरण अग्रवालानुसारमुपर्युक्तविषयानतिरिच्य गान-नृत्यवाद्याकलानां तदानीं शिक्षाम् अदीयत।

परन्तु ब्रह्मचारीणां स्नातकानां कृते सा शिक्षा निषिद्धा आसीत[147]। मनुस्मृतौ असच्छास्त्राधिगमनमुपपातकस्य स्थानमिति[148], वेदातिरिक्तस्मृतीनामध्ययनं चार्वाकादिकृत-शास्त्राध्ययनं च परलोके निष्फलकारणमिति भर्त्सना कृताऽस्ति।[149]

स्त्रीशिक्षायाः विषयाः

स्त्रियः सामाजिकसाहित्यिकराजनीतिशिक्षाः प्राप्त-वत्यः। साहित्यिकशिक्षाक्षेत्रे ताभ्यः प्रथमतः व्याकरण-कोषग्रन्थानां च शिक्षा दत्ता। तत्पश्चात् कालिदासबाणादीनां ग्रन्थाः अधीतवत्यः। छन्दोरचनायाः शैलीविषये काव्यशास्त्रविषये च सम्यग् ज्ञानं लब्धवत्यः। प्राचीनकवीनां रचनानुकरणं कृत्वा नूतनरचनां कर्तुं प्रोत्साहनं दीयते स्म। ताः महाकाव्यं पुराणमाख्यानं च पठितवत्यः। वादविवादस्य शिक्षा दीयते स्म। कलाक्षेत्रे वात्सायनेन वर्णितानां चतुष्षष्टिकलानां शिक्षां लब्ध-वत्यः[150]। तासु कलासु नार्यः पठने लेखने

विभिन्नभाषाधिगमेऽभिनये श्रृङ्गारे पाकशास्त्रे सङ्गीतकलायां मनोरञ्जनकलायां गृहसज्जाविषये क्रीडनकनिर्माणे हस्तकलायां च निपुणाः स्युः। तासु कलासु एकतृतीयांशाः साहित्यविषये आगच्छन्ति। अवशिष्टांशाः नायिकानायकयोः विलासक्रीडायां सहायकाः, मनोविनोदस्य साधनं, दैनन्दिनजीवनस्य प्रयोजनानां पूरकाः भवन्ति। निःसन्देहं वक्तुं शक्यते यत् एताः चतुःषष्टिकलाः नारीणां कृते अत्यावश्यकाः भवन्ति। ताभिः कलाभिः ताः गुणवत्य; सुन्दर्यः सुस्थाश्च भवेयुः। गृहस्थजीवनं स्वाच्छन्देन यापयितुं समर्था स्वगुणैः गौरवा आसन् नार्यः किन्तु अध्यापकानामभावेन सम्भ्रान्तपरिवारस्य नार्यः सर्वाः कलाः शिक्षितुं समर्था आसन्। सत्यभामया सह वार्त्तालापसमये द्रौपदी गौडकर्मविषये अजानादिति उक्तवती। गृहकर्मणः दायित्वं नारीषु न्यस्तमासीत्। कर्तनमाल्यग्रन्थनकर्मणि प्रायः सर्वाः नार्यः अभिज्ञा आसन्। मनुमतानुसारं शिल्पज्ञानं नारीणां कृते अत्यावश्यकं भवति।[151]

राजनीतिविषये सम्भ्रान्तपरिवारस्य कन्यकाः राजकुमार्यश्च शिक्षां प्राप्तवत्यः। अस्याः शिक्षायाः व्यवस्था पारिवारिकपरिस्थितिषु परिवारजनैर्जाता आसीत्।

उपर्युक्तविवेचनया ज्ञायते यत् यद्यपि प्राचीनकाले

भारतीयनार्यः वैदिकशिक्षां प्राप्तवत्यः तथापि स्मृतिकाले वञ्चिता अभवन्। अस्यार्थ एतन्न भवति यत् नार्यः कस्मिन् विषयेऽपि शिक्षां नैव प्राप्तवत्यः इति। साहित्यिकज्ञानप्राप्तौ काव्यरचनायां शिल्पकलासु च दक्षतां प्राप्तुं ताः अवसरं प्राप्तवत्यः। परन्तु परिवारे शिक्षकस्य नियुक्तिं कर्तुमत्यल्पाः जनाः समर्था आसन्। बह्व्य नार्यः अशिक्षिताः अभवन् सामूहिकशिक्षाव्यवस्थाऽभावेन। येन अल्तेकरमहाभागाः तासां शिक्षितनारीणां संख्या पञ्चप्रतिशतमिति कथयन्ति।[152]

❐ ❐

---

1. ऋ. वे० १/११७, १/३९-४०
2. ऋ० वे० -१०/१८९
3. She was not only a Ṛsi, Composer of Ṛks, but also a priestess discharging the priestly office, worshipping gods at dawn with hymns and oblations.

   -K. C. Macdonald (ऋ० वे० ५/२८)
4. अ० वे० - XI-७-२०

5. अथर्ववेद: -X-३-१८
6. गोभि० गृ० सू० -११-१-१९
7. गोभि० श्रौ० सू० - १-३-१५
8. संस्कृतरत्नाकर 'शिक्षांक' - १९४० तत्र 'कीदृशी शिक्षाप्रणाली इदानीमपेक्षते- पृ०. १०६।
9. सुभाषितरत्नभण्डागार - पृ० ४०- Verse-२१
10. डॉ० राजवली पाण्डेय -'हिन्दुसंस्कार' पृ० ३४
11. श० प० ब्रा० -५-१, ६-०, 'अयज्ञियो वा एव योऽपत्नीक:'
12. ऋ० वे० ५-३१, 'या दम्पती सुमनसा सुनुत आच धावत: देवा सो नित्ययाशिश:।
13. अष्टाध्यायी -४-१+३३ 'पत्युर्नो यज्ञसंयोगे'।
14. पा० गृ० सू० - २-२०, 'स्त्रियश्चोपयजेदनाम्ना य चरितत्वात्।
15. ४.१६.१२- तत: स्वस्त्ययनं कृत्वा मन्त्रविद्विजयैषिणी।
16. ५.१५.४५ - सन्धाकालमना: श्यामा: ध्रुवमप्येति जानकी।

    नन्दीं चेमां शुभजलां संन्ध्यार्थं वरवर्णिनी।।
17. महा० भा० - ३.३०५.२०

18. A. S. Altekar, 'The Position of Women in Hindu Civilization' 1957. 2nd edi. PP. 198.

19. स्मृतिचन्द्रिका- पृ० २४, गोभि० गृ० सू० -२-१-१९

20. अ० वे०, ६-५-१५

21. पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते।

अध्यापनं च वेदानां सावित्रीवचनं तथा।।

पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः।

स्वगृहे चैव कन्याया भैक्ष्यचर्या विधीयते।। यम-

22. हारीत, द्विविधा स्त्रियो ब्रह्मवादिन्यः सद्योद्वाहाश्च। तत्र ब्रह्मवादिनीनामग्नीन्धनं वेदाध्ययनं स्वगृहे च भैक्ष्यचर्येति।

-वीर० सं० प्र० भागः -२, पृ० ४०२।

23. अलतेकर- प्रचीन भारतीय शिक्षणपद्धतिः' पृ० १५७

24. बृ० उ० -२-४, ४-५

25. बृ० उ०- ३-६-१

26. उत्तररामचरितम् - अंक -२

27. भागवतपुराणम्- ४-१-६४

28. Altekar, The Position of Women. PP.-12
29. बृ० उ० – ४-४-१५
30. मनु० – २-१६
31. मनु० – २-६७
32. मनु० – २-६६
33. याज्ञ० ११३
34. पुराणमीमांसा – ६-२.२
35. पुराणतन्त्र, वी० मि० परिभाषा –पृ० ४०
36. Altekar, Great Women of India - PP- 31.
37. पाणिनीयशिक्षा- ५२,

    मन्त्रहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

38. गोभिः गृ० सू०- २-१-२१, जै० गृ० सू०- १.२०
39. याज्ञः – १-६४
40. मनु० २-६७
41. A. S. Altekar, The positian of Women in Ancient India , Page-17.

42. काव्यमीमांसा-पृ० ५३
43. A. S. Altekar, Education in Ancient India, PP 220.
44. वात्स्यायन, का० सू० १-३-१६
45. गाथासप्तशती- रेवा-१.५७, ९०, शेष, २-६३, माधवी' १-९१।
    अनुलक्ष्मी ३-२५, ६३, ७४, ७६, पाहायी- १-७०, वृद्धवाही- १.५६
    शशिप्रभा- ४४
46. राजशेखर:- सूक्तिमुक्तावली-शब्दार्थयो: समो गुंफ: पाञ्चाली वृत्तिरिष्यते।
47. सूक्तिमूक्तावली- सूक्तिनां केलीनां कलानां च विलासभू:।
    प्रभुर्देवी कवि: लाटी गतापि हृदि तिष्ठति।
48. सूक्तिमुक्तावली–
    सरस्वतीव कर्णाटी विजयांका जयत्यसौ।
    या वैदर्भीगिरां वास: कालिदासादनन्तरम्।।
    नीलोत्पलदलश्यामां विजयांकामजानता।
    वृथैव दण्डिनाप्युक्तं सर्वशुक्ला सरस्वती।
49. डॉ. अल्तेकर : – प्राचीन भारतीय शिक्षण पद्धति- पृ० १६५

50. काव्यमीमांसा–

पार्थस्य मनसि स्थानं लेभे खलु सुभद्रया।
कवीनां च वचोवृत्ति चातुर्येण सुभद्रया ।।

51. शंकरदिग्विजयम् -५१, विधाय भार्यां विदुषीं सदस्यां०..

52. नादवी कृत अरव और भारत के सम्बन्ध - पृ० १२२।

53. असहाय: नारदस्मृति: -१०-३० शास्त्राध्ययनानधिकारित्वात्

शास्त्रमात्रोपजीविधर्मा धर्मज्ञानाभावादस्वातन्त्र्यम्।

54. शत० ब्रा० -१४-३१-३५

55. कामसूत्रम्- १-३-१६

56. नलचम्पू: - ३, प्रियदर्शिका- अं० १ -पृ० १०

57. माल० मित्रम् - अं० १

58. हर्षचरितम् - उच्छ्वास: ४-७

59. उत्तरमेघ: - २६

60. उत्तरमेघ: -२६, शाकुन्तलम् - अं० ६, विक्रमो० - अ०- २, मालतीमाधवम् अं० 1.

61. रत्नावली - अं०- २

62. मनु०- ६.११

63. मनु०- ९.७५
64. मनु०- ५.१५७
65. मेघातिथिः मनु०- २-१६
66. नन्दनः मनु०- ९.१५, ' अध्ययन बाह्याः
67. राजतरङ्गिणी, ७.९०५, ९०९, ९३१, ८.११३७-९
68. इण्डियान् ऐन्टिक्वेरी-भाग-१, पृ० २७४, भाग- १८, पृ० ३७
69. मालकम, मेमोयर्स- २, पृ०- ९९-१००
70. ब्रह्मणमधीयानं दशवर्षाणि (प्रतीक्षेत), आ० शा०- ३-४
71. अल्तेकर, प्रचीन भारतीयशिक्षापद्धति- पृ० ९१६६
72. मनु०- २-११५
73. अथर्ववेदः -११.१५, १७
74. तै० उ० १.११, वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर।
75. चकरकसंहिता-विमानस्थानं- ८-६-८
76. सुभाषितं-सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।
77. मनु०- २.११२-११४

78. अल्तेकर, प्र० भा० शि० प०- पृ० २०।

79. याज्ञ०- ३.२२८

80. आप० ध० सू०- २-२-२४

81. तै० उ०- १।११

82. मनु०-२.१९१

83. मनु०- २.१७५

84. सुभाषितं-आचार्यात्पादमादत्ते.....

85. अल्तेकर, प्रा० भा० शि० प०....पृ०- १२५

86. अ० वे० ११-५, मनु०- २.१४८, २.१६९

87. V. S. Agrawal, "India as described by Manu-PP-11

88. मनु०- २.१७०

89. हारितस्मृतिः-३-१, मनु० २-१६४

90. मनु० 2. १८२, १९४

91. मनु० २-५१

92. मनु०- २.१७६

93. जातकसंख्या- २५.२

94. महा० भा०- १३-३६-१५

95. महा० भा०- १, ९१

96. मनु० ४-१०७/१०८

97. मनु० २-१८४

98. मनु० २-१४२

99. Anunal Reports of South Indian Epigraphy.

100. Bevnier, PP. 145,

101. जातकसंख्या- ४५६

102. मालतीमाधनम् १.१७

103. विष्णु० स्मृ०- ३०-२६

104. पराशरस्मृतिः-१.२, टीकायां माधवेनोद्धतं लघुहारीतस्य वचनम्- पृ० ५३

105. उत्तर. रा० च० अंक-२

106. मालतीमाधवम्-अंक-१

107. आश्व, गृ० सू०- ३-८-२

108. पतञ्जलिः - ३-८-२२

109. पाणिनिः - ६-२-८६, छात्रयाद् यः शालायाम्।

110. रामदास गौड:- हिन्दुत्व' ज्ञानमंडल यन्त्रालय, काशी, सं १९६५

111. Mukherji-Problems of Administration of Education in India, P.- 259.

112. कामसूत्रं- ३-५-३०, बौ० ध० सू०- १-११-१३-७

113. हारीत:- वीर० सं० - भाग-२, पृ० १०४

114. मनु०- २.६७

115. अल्तेकर, प्रा० भा० शि० प०- पृ०-१६०

116. मनु०- २-१०

117. मनु०- ११-२६४

118. मनु०- ३.१४५

119. मनु०- ७.४३

120. Ibid- ११.२४९-२६०

121. Ibid- ११.३३

122. Ibid- ४.१००

123. मनु०- ९-१२६

124. Ibid- १०-१०५

125. Ibid- ४.१२३

126. मनु०- ६.२९

127. मनु०- २.१४०

128. मनु०- २.१६०

129. मनु०- १२.१११

130. मनु०- ६.७२

131. मनु०- २.१०५ वेदोपकरणे....

132. मनु०- ४.१९ निगमांश्चैव

133. मनु०- ३.१८५ षडङ्गवित्

134. मनु०- ३.६७

135. मनु०- ११.११८

136. मनु०- २-१० धर्मशास्त्रं तु बै

137. मनु०- ३.२३२

138. मनु०- ७-४१,४२

139. मनु०- ५-२२

140. मनु०- १०-१०६

141. मनु०-२२-१०.१०७

142. " ९.२८

143. " ६.२१

144. " ४.१९

145. " ९-३३१, ३३२

146. मनु०- ७.४३

147. मनु०- ७.४३

148. मनु०- ९.३२१, ३३७

149. India Described by Manu-V. S. Agrawal, P-10.

150. मनु०- ११-६५

151. " - १२.९५

152. अलतेकर, प्रचीनभारतीय शिक्षा पद्धति- पृ० २३०-२३२

पञ्चमोऽध्यायः

उपसंहारः

न गृहं गृहमुच्यते गृहिणी गृहमुच्यते' इति भावना न केवलमधुनातनयुगेऽपितु वैदिकयुगे प्रसिद्धाऽऽसीत्। यज्ञकार्यसम्पादनेऽपत्नीकस्याधिकारो नासीत्। 'अयज्ञो वा ह्येष योऽपत्नीकः' (तै० ब्रा० २-२-२-६) इति तैत्तरीयब्राह्मणं ब्रूते। वैदिकऋषयः नारीणां गुणविषये नित्यं स्तुवन्ति स्म। सा एव विभिन्नस्थलेषु आदर्शमातुः भगिन्याः भार्यायाः कन्यायाश्च दायित्वं निर्वहति। वैदिकऋषिसदृशाः वेदकालीनऋषयोऽपि क्रान्तदर्शिन्यः आसन्। स्वाध्यात्मदृष्टिद्वारा वेदमन्त्राणां दर्शनं कृतवत्यः। ताः भवन्ति-लोपामुद्रारोमाशापालाप्रभृतयः। अनेकाः नारीकवयः आसन्निति तैत्तरीयब्राह्मणे वर्णनमुपलभ्यते। तासु विश्ववारा-सिकता-निवावरीघोषाप्रभृतीनां कविकर्म इदानीमप्युपलभ्यते।

पुरा बालिकानामपि वेदमन्त्रपाठपूर्वकमुपनयनसंस्कारः

कार्यते स्म। स्मृतिकारा एवास्य प्रमाणम्। यथा–

पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनं तु वेदानां सावित्रीवचनं तथा॥

कन्या ब्रह्मचर्यव्रतपालनपूर्वकं स्वयोग्यं वरमाप्नोति स्म। यथा–ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्। (अथ० वे० ११-५-१८)। उपनयनस्योपरान्तं बौद्धिकविकासार्थं पुरुषब्रह्मचारिवत् बालिकानामपि विद्याभ्यासस्य प्रचलनमासीत्।

वेदकाले स्त्रीच्छात्राणां विभागद्वयमासीत्। (क) सद्योद्वाहा (ख) ब्रह्मवादिनी च। तत्र ब्रह्मवादिनीनामग्निन्धनं वेदाध्ययनं स्वगृहे भैक्षचर्येति। ब्रह्मचर्याश्रमोपरान्तं विवाहं कृत्वा गार्हस्थ्यजीवनमभिमण्डयन्ति। आसां विवाहवयः षोडश सप्तदशं वा वर्षाणि भवति। स्वपत्युः धार्मिककृत्येषु अग्न्याधानादिकार्येषु सा परमसहायिका भवति।

ब्रह्मवादिन्यः स्त्रियः ब्रह्मचिन्तनं कृत्वा तपःपूतजीवनं यापयन्ति। आध्यात्मानुभूतिद्वारा ब्रह्मतत्त्वसम्बन्धिदार्शनिकव्याख्यानं कृत्वा समाजस्योपस्कारकाः भवन्ति।

इदानीं विंशतिशताब्द्यां स्वाधीनताप्राप्त्यनन्तरं नारीशिक्षाव्यवस्थायां बहुतरा उन्नतिरवलोक्यते। पुरुषसदृशो नारीणामपि समानोऽधिकारो वर्तते। प्राय: सर्वत्र शिक्षणसंस्थानेषु सहशिक्षाव्यवस्था प्रचलति। एतदतिरिच्य तासां कृते स्वतन्त्रविद्यालया: पद्मावतीविश्व-विद्यालयप्रमुखाश्च प्रार्थक्येन वर्तन्ते। साधारणशिक्षाविषयं त्यक्त्वा वैषयिक- विषयेष्वपि नारीणां स्थानमतितरं भजते। यथा क्रीडासु वैज्ञानिकक्षेत्रेषु चिकित्साशास्त्रेषु राजनीतिपरिस्थितिषु ता: पारदर्शितां प्रदर्शयन्तीति शम्।

भाविशोधकर्तृणां कृते सूचना

अनुसन्धानमिदं वेदकालीनशिक्षणव्यवस्थायां नारी-शिक्षेति वर्तते। एतद्विषय-सम्बनधीनि इतराणि शोधकार्याणि कर्तुं शक्यते। तानि एवं विधानि भवितुमर्हन्ति। यथा–

1. वेदकालीनशिक्षणव्यवस्थायां राजनीतिशास्त्रशिक्षाव्यवस्था।
2. वेदकालीनशिक्षाव्यवस्थायामनुशासनदण्डादीनां व्यवस्था।
3. वेदकालीनशिक्षाव्यवस्थायां धर्मशास्त्रस्य प्रभाव:।
4. वेदकालीनशिक्षाव्यवस्थायां प्रौढशिक्षाव्यवस्था।

5. वेदकालीनशिक्षाव्यवस्थया सह आधुनिकशिक्षाव्यवंस्थाया-स्तुलनात्मकमध्ययनम्।
6. वेदाङ्गेषु शिक्षाव्यवस्थाया: अध्ययनम्।
7. भारतीयहिन्दूविधौ नारीणां स्थानम्।
8. वेदकालीनबौद्धकालीननारीशिक्षाव्यवस्थयोस्तुलनात्मक-मध्ययनम्।
9. आधुनिकशिक्षणविधिव्यवस्थायां वेदकालीनशिक्षणविधिव्य-वस्थानां प्रभावस्याध्ययनम्।
10. वेदकालीनजैनकालीनशिक्षणव्यवस्थायां नारीशिक्षणव्यवस्था-यास्तुलनात्मकमध्ययनम्।

सहायकग्रन्थानां सूची

(BIBLIOGRAPHY)

1. **आश्वलायन :–**

आश्वलायनगृह्यसूत्रम् कलिकातानगरे सरस्वतीयन्त्रेमुद्रितम्, द्वितीयसंस्करणं, 1893 ॥

2. **–ऋृग्वेदभाषाष्य प्रथमभागः–**

दयानन्दसंस्थान, नई दिल्ली–5, संवत्–2230

3. ऋग्वेदभाषाभाष्य, द्वितीय भाग, दयानन्द-संस्थानम्, नई दिल्ली–5, संवत् –2233

4. **डॉ० अनन्त सदाशिव अल्तेकर :-**

प्राचीनभारतीय शिक्षण पद्धति वाराणसी–1979–80

5. **मनु :–** मनुस्मृतिः भारतीय विद्याभवनम्, मुम्बई, 1972।

6. **प्रो० वंशीधर सिंह :-**

भारतीय शिक्षा का संक्षिप्त इतिहास, गयाप्रसाद एण्ड सन्स, आगरा।

7. **प्यारेलाल रावत :-**

भारतीय शिक्षा का इतिहास, रामप्रसाद एण्ड सन्स, आगरा-37th Ed. 1965

8. **बी० पी० जौहरी पी० डी० पाठक :-**

भारत में शिक्षा, विनोद पुस्तक भण्डार, आगरा, 1962

9. -do- भारतीय शिक्षा की रूपरेखा, विनोद पुस्तक मन्दिर, आगरा, 1962

10. **पी० डी० पाठक :-**

भारतीय शिक्षा और उसकी समस्याएँ, विनोद पुस्तक मन्दिर, आगरा, 1990।

11. **डॉ० सरजू प्रसाद चौबे :-**

पाश्चात्य शिक्षा का इतिहास, लक्ष्मीनारायण अग्रवाल, आगरा, 1959

12. **आचार्य बलदेव उपाध्याय :-**

वैदिक साहित्य और संस्कृति, वाराणासी, 1980।

13. डॉ० रामजी उपाध्याय :–

भारतीयसांस्कृतिकनिधि:
गांधी विश्वपरिषत्, दाना सागर, 1958

14. Dr A. S. Altekar:-

Education In Ancient India, Printed in India by Raja Printing Press, Varanasi, 1957.

15. Dr. Radha Kumud Mukerji-

Ancient Indian Education, Macmillian, London, 1951.

16. Prof. P. B. Bapat:-

2500 years of Buddhism Govt. of India, 1976.

17. Methodology of Educational Research H. P. U, Simla, 1983.

18. Winternitz :-

History Of Indian Literature Varanasi.

19. Religion on Philosophy of Veda & Upanisads. Varanasi-1966.